★ श्रीमते रामानुजाय नमः ★

★ श्रीलक्ष्मीनारायणाभ्यां नमः ★

श्रीवादिभीकरमहागुरवे नमः

पितृयाग – पद्धतिः

लेखक

श्री शठकोप यतिराज रामानुज जीयर स्वामी

सहस्रधारा पर्वत, धवलागिरी

निवासी

सम्पादक

पराङ्कुश निरौला

रामाइलो गाउँ मोरङ

द्वितीय संस्करण

वि. सं. २०४७ धनुर्मास   मूल्य रु. १०।–

★ श्रीमते रामानुजाय नमः ★

★ श्रीलक्ष्मीनारायणाभ्यां नमः ★

श्रीवादिभीकरमहागुरवे नमः

पितृयाग – पद्धतिः

लेखकः

श्री शठकोप यतिराज रामानुज जीयर स्वामी

सहस्रधारा पर्वत, धवलागिरी

निवासी

सम्पादक

पराङ्कुश निरौला

रामाइलो गाउँ मोरङ

द्वितीय संस्करण

वि. सं. २०४७ धनुर्मास

मूल्य रू. १०।–

प्रकाशक :
श्रीवैष्णव समाज
लक्ष्मीनारायण मन्दिर
माइधार, झापा

द्वितीय संस्करण २०४७
प्रति १०००

नीलातुङ्गस्तनगिरितटीसुप्तमुद्‌बोध्य कृष्णं,
पारार्थ्यं स्वं श्रुतिशतशिर: सिद्धमध्यापयन्तीम्
स्वोच्छिष्टायां स्रजि निगलितं या बलात्कृत्य भुङ्क्ते
गोदा तस्यै नम इदमिदं भूय एवास्तु भूय: ।।

श्रापनो अत्यन्त राम्रो हृदय कमलमा मग्न श्रीकृष्णलाई जागा पारी पढाई सकल उपनिषद्–सिद्धशेषत्वलाई आपनो उच्छिष्ट माला पहिरन बहुतै प्रेमि ती श्रीनिधानलाई भोग्ने हठैले जननि ! म त रमी भज्छु गोदे ! सदैव

श्रीगोदा स्तुति:

मुद्रक :
लुष प्रेस
ख १–२७३ काठमाडौं थानेश्वर फोन ४–७२५..

श्रीमते रामानुजाय नम:

श्रीलक्ष्मीनारायणाभ्यां नम:

ग्रन्थकर्ता
श्री १००८ श्रीविभूषित स्वामी श्रीशठकोप
यतिराज रामानुज जीयर
सहस्रधारा
जि. पर्वत (ग. अ.)

★ श्रीमते रामानुजाय नमः ★

किञ्चिन्निवेदनम्

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्माभ्यां प्राप्यते पुरुषोत्तमः ॥

पाञ्चरात्रसंहिताऽनुसारित्वेन श्रीवैष्णवकर्मकाण्डेषु परमं प्रामाण्यमावहन्तीयं "पितृयागपद्धतिः" वेदान्तविद्याविद्योतितान्तःकरणैः तुर्याश्रमं सुशोभयद्भिः श्रीमद्वेदमार्गेत्यादिसकलगुणगणविभूषितैः तत्र भवद्भिः श्री १००८ श्रीशठकोप यतिराज रामानुज 'जीयर' स्वामिवर्यैः संकलिता । तदनुमत्यैव चित्रवनस्थश्रीवैष्णवपुस्तकप्रकाशन समित्या रामाग्निनभोलोचन (२०३३) मिते वैक्रमाब्दे प्रकाशिता च । इदानीं पुनः शैलाब्धिनभोलोचन (२०४७) मिते वैक्रमाब्दे द्वितीयसंस्करणप्रकाशनायाऽऽवश्यकतानुसारं श्रीस्वामिवर्याज्ञयैव श्रीपराङ्कुशःरामानुजःश्रीवैष्णवदासः निरौला इति प्रसिद्धस्य महानुभावस्य सत्प्रयासेन बहुजनसुलभाय 'श्रीलक्ष्मीनारायणमन्दिर' माइधारस्थेन मन्दिरपरिवारेण पुनर्मुद्रिता ।

आशासेऽस्या अनेन संस्करणेन बहूनां भागवतानां महानुपकारः स्यादिति ।

विदुषांविधेयः

श्री लक्ष्मीनारायण मन्दिर, माइधार, झापा

केशवाचार्यः

२०४७ / धनुर्मास

विषय–सूची

विषय	पितृयाग विधि	पृष्ठ
१. पूर्वदिनविधिः		१
२. श्राद्धदिनविधि		२
३. कर्मपात्र निर्माणविधि		२
४. हवनविधिः (यागभूमि) संस्कारादि		४
५ विष्वक्सेनपूजनविधि कलशादिसहितम्		७
६ विश्वेदेवपूजनम्		१३
७. चतुर्व्यूहादि आवाहनम् पूजनञ्च		१४
८. अग्निसंस्कारम् हवनञ्च		१६
९. चतुर्विंशतिनाम हवनम्		२१
१०. वैकुण्ठपार्षद होमः		२२
११. पूर्णाहुति		२८
१२. अन्नादि दानम्		३१
१३. पिण्डदानम् तर्पणञ्च		३३–३५
१४. पितृआवाहनम्		४४
१५. पितृतर्पणम्		४५
१६. महाभागवताऽराधना		५३
१७. परिशिष्टम्		५७
१८. पुरुषसूक्तम्		६४
१९. जितन्तेस्तोत्रम्		६७
२०. मन्त्रपुष्पाञ्जली		७७
२१. तुलसीअर्चना		७८
२२. पुण्याहवाचनम् (संक्षिप्त)		(कभर पृ.)

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

अथ पितृयागपद्धतिः

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥
त्रय्यन्ताः[1] कर्मभागेन सौहार्दं समधिश्रिताः ।
मुक्तिं यद्भजनादाहुस्तमनन्तमुपास्महे ॥
कुलं[2] पवित्रं जननी कृतार्था,
वसुन्धरा भाग्यवती च धन्या ।
स्वर्गे स्थिता ये पितरोऽपि धन्याः,
येषां कुले वैष्णवनामधेयः ॥

पूर्वदिनविधिः

पूर्वदिने [3]तीर्थस्नानविधिना स्नात्वा भगवत्समाराधना-विना पवित्रीकृत्रं सात्त्विकाऽऽहारं सकृद्भुक्त्वा, सायङ्काले महा-भागवतब्राह्मणाऽऽमन्त्रणं [4]वासुदेवादिनामभिः कुर्यात् । अथाऽद्य

---

१. शतदूषणी ३ वाद । २. पद्मपुराण उत्तरखण्ड ।
३. वैकुण्ठचन्द्रिका-पृष्ठ ३९ । ४. वासुदेव-संकर्षण-प्रद्युम्न-अनिरुद्ध ।

प्रकारः । तेषु ताम्बूलादिकं समर्प्य– "भो वासुदेवादिस्वरूपिणो महाभागवताऽऽचार्याः ! श्वो दिने करिष्यमाणपितृस्वरूपिभगवत्समाराधनकर्मणि भवन्तो मया, आमन्त्रिता अभिवादये भो !" इत्युच्चार्य साष्टाङ्गप्रणामं कुर्यात् । स्वगृह आगत्याऽधःशायी भवेत् ॥

अथ श्राद्धदिनविधिः

नित्यकर्माणि कृत्वा पुनः स्नात्वाऽऽगत्य, ऊर्ध्वपुण्ड्रादिकं कृत्वा नूतनयज्ञोपवीतवस्त्रादिकं परिधाय, आगतानां महाभागवतानां हस्तपादप्रक्षालनादिकं कारयित्वा, आसनेषु सत्कृत्य गन्धादिभिः संपूज्य प्रणम्य आसीत । अथाचार्यो हस्तपादौ विशोध्य, आचम्य प्राणानायम्य, उपलिप्तां भूमिं विशोध्य, कर्मपात्रं कारयेत् । ततः पवित्रपात्रमभिमन्त्रयेत्–

ॐ यद्देवा देवहेडनन्देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳ हसः ॥ १ ॥ यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान् मुञ्चत्वꣳ हसः ॥ २ ॥ यदि जाग्रद्यदि स्वप्नऽ एनाꣳसि चकृमा वयम् । सूर्यो मा तस्मादेनसो विश्वान् मुञ्चत्वꣳ हसः ॥ ३ ॥

कर्मपात्रे पवित्रं निक्षिपेत्–

ॐ पवित्रे स्थो वैष्णव्यौ सवितुर्वः । प्रसवऽ

उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः ॥

जलम्–

ॐ शन्नो देवी रभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥

तिलान्–

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः । प्रत्नमद्भिः पृक्तः स्वधया पितॄल्लोकान् प्रीणाहि नः स्वाहा ॥

गन्धम्–

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

अक्षतान्–

ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥

पुष्पम्–

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुं मऽइषाण सर्वलोकं मऽइषाण ॥

यागभूमिमभिषिञ्चेत्–

ओं अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।। इति ।।

ततो रङ्गवल्यादिभिर्भूमिं समलङ्कृत्य मण्डलस्योत्तरभागे शालग्रामस्वरूपिलक्ष्मीनारायणस्थानं परिकल्पयेत् । ततो दक्षिणे-मण्डलमध्ये होमवेदीं कल्पयेत्[1]–

तत्र होमवेद्या दक्षिणे भागे ब्रह्मस्थानम्, परितोऽष्टदिक्षु, अष्टवसुस्थानम् मण्डलस्याऽऽग्नेये विष्वक्सेनस्थानं, पुण्याहं[1] चेत् पूर्वे । होमवेदितो दक्षिणे भागे चतुर्व्यूहस्थानं, व्यूहस्य पश्चिमे विश्वेदेवस्थानं, व्यूहस्य, अग्रे पिण्डवेदीं, हविरादिस्थानं च परिकल्प्य, अन्यां, सामग्रीं यथासंभवस्थानेषु स्थापयेत् ।

अथ पञ्चभूसंस्काराः । ते च मण्डले दर्भैः परिसमूहनम् १, गोमयेनोपलेपनम् २, दर्भमूलेन वेद्यां रेखात्रयकरणम् ३, अनामिकाङ्गुष्ठाभ्याम्, मृदमुल्लेखनक्रमेणोद्धृत्य ऐशान्यां क्षेपणम् ४, शुद्धजलेन प्रोक्षणम् ५ इति पञ्च ।

अथ गौरसर्षपैर्दिग्रक्षणं कुर्यात्–

पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैऋते ।।

---

१. पूजयित्वा पुरा देवं तर्पयित्वा हुताशनम् इति प्रमाणात् ।
वेदी परिशिष्टेद्रष्टव्या ।

१. पुण्याहं नलिखितमत्र ऐच्छिकत्वात् ।

वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदैशान्यां तु गदाधरः ।।

ऊर्ध्वं गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः ।।
एवं दशदिशो रक्षेद्वासुदेवः सनातनः ।।

अथ भूपूजनं कुर्यात् सर्वोपचारैः–

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।
पृथिवि ! ब्रह्मदत्तासि कश्यपेनाभिवन्दिते ।।

भो भूदेवि ! त्वामावाहयामि पूजयामि । इत्यावाह्य

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्रीं पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीं माहिꣳसीः ।।

इति पूजयेत् ।

अथ वराहपूजनम्–

ॐ हूं वराहाय नमः भो वराह ! त्वामावाहयामि, पूजयामि यथालब्धोपचारान् गृहाण ।

ॐ वराहवः स्वतपसः विद्युन्महसो धूपयः ।
श्वापयो धृह मेधांश्च त्येते ये चेमेऽशिमिविद्विषः ।।

इति उपचारान् समर्प्य नमस्कुर्यात् ।

अथानन्तपूजनम्–

ॐ भूर्भुवः स्वः अनन्ताय नमः, भो अनन्त ! भवन्तमावाहयामि यथालब्धोपचारैः पूजयामि, इमां पूजां गृह्णातु ।

ॐ तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे । अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः संभरन्ति ।।

इत्युपचारान् दत्वा प्रणमेत् ।

नमोऽस्त्वनन्ताय सहस्रमूर्तये, सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते, सहस्रकोटियुगधारिणे नमः ।। इति

अथ कूर्मपूजनम्–

ॐ कूर्माय नमस्त्वामावाहयामि, यथालब्धोपचारान् गृहीत्वा सुप्रसन्नो भव ।

ओं कूर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो नरिष्याः ।
अथावहासि सुमनस्य मानो भागं देवेभ्यो हविषः सुजातः ।।

इत्युपचारान् दत्वा, प्रणमेत् ।

दिव्यामृतार्थं मथिते महाब्धौ, देवासुरैर्वासुकिमन्दराभ्याम् ।
मज्जन्तमब्धौ धृतमद्रिमङ्गे, तं कूर्मरूपं प्रणमामि भक्त्या ।।

ततो दीपं प्रज्वाल्य, पूर्वं संस्थाप्य पूजयेत् ।

ॐ स्थिरो भव व्वीड्वङ्ग आशुर्भव वाज्यर्वन् ।
पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।।

प्रायश्चित्तगोदानम् ।

ततः नमोऽस्त्वनन्तायेति, प्रणमेत् ।।

अथ विष्वक्सेनपूजनम्

पुनरर्घ्यादिकं संपाद्य, कर्ता, आचम्य प्राणानायम्य, हस्ते द्रव्यदक्षिणाताम्बूलादिकमादाय संकल्पयेत्–

देशकालादिकं संकीर्त्य, अमुकगोत्रस्य, अमुकस्य मम पितृस्वरूपिणः श्रीमन्नारायणस्य समाराधनं विष्वक्सेनविश्वेदेवादि पूजनपूर्वकं करिष्ये । इति ।

सर्वमङ्गलमाङ्गल्यं सर्वोपद्रवनाशनम् ।
वन्दे रामानुजार्यस्य नित्यं पादाम्बुजद्वयम् ।। इति

लक्ष्मीनाथेत्यादि च श्लोकमनुसंदध्यात् । ततो निम्नाङ्कितैस्तैर्मन्त्रैस्तत्तत्कार्यं कुर्यात् ।

भूप्रार्थना–

ॐ भूमिर्भूम्ना द्यौर्वरिणान्तरिक्षं महित्वा उपस्थेते देव्यदितेऽग्निमन्नाद मन्नाद्यायादधे ।।१।।

धान्यास्तरणम्–

ॐ धानावन्तं करम्भिणं मपूपवन्त मुक्थिनम् ।
इन्द्रप्रातर्जुषस्वनः ।।

कलशस्थापनम्–

ॐ कुम्भोवनिष्टुर्जनिताशचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः । प्लाशिर्व्यक्तशतधार उत्सो दुहे न कुम्भी स्वधां पितृभ्यः ।।

जलपूरणम्–

ॐ अपो देवी रुपह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वꣳ हविः ।।

दृढीकरणम्–

ॐ स्थिरोभव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहणः ।।

पल्लवनिक्षेपः–

ॐ अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता । गोभाज इत्किलासथ यत्सनवथ पूरुषम् ।।

कुशकूर्चनिक्षेपः–

ओं पवित्रन्ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनु नं तदामोऽश्नुते शृतासइद्वहन्त स्तत्समासते ।।

दूर्वानिक्षेपः–

सहस्रपरमा देवी शतमूला शताङ्कुरा ।
सर्वं हरतु मे पापं दूर्वा दुःस्वप्ननाशिनी ।।

फलनिक्षेपः–

याः फलिनीर्या अफलाऽअपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चत्वꣳ हसः ।।

सर्वौषधी[1]निक्षेपः–

याऽऔषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनैनु बभ्रूणामहꣳशतम् धामानि सप्त च ।।

पञ्चरत्न[2]निक्षेपः–

परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्र-त्नानि दाशुषे ।।

गन्धनिक्षेपः–

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।।

१—कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दनम् ।
वचा चम्पकमुस्ता च सर्वौषध्यो दश स्मृताः ।।

२—सुवर्ण, हीरा, मोती, नीलमणि एवं पद्मरागमणि ।

सप्तमृन्निक्षेपः–

मृत्तिके प्रतिष्ठितं सर्वं तन्मे निर्णुद मृत्तिके ।
त्वया हृतेन पापेन गच्छामि परमाङ्गतिम् ॥

कलशमुखेपूर्णपात्र-स्थापनम्–

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

पूर्णपात्रोपरि श्रीफलस्थापनम्–

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथबिल्वः । तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥

कलशे वस्त्रवेष्टनम्–

सुजातो ज्योतिषा सह शर्म वरूथमासदत्स्वः ।
वासोऽअग्ने विश्वरूपं संव्ययस्व विभावसो ॥

कलशप्रतिष्ठां पीताक्षतैः कुर्यात्–

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु । विश्वे देवासऽइह मादयन्तामों ३ प्रतिष्ठ । एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥ इति

ततः प्रार्थना

देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ।
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥

सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ।

इति नमस्कुर्यात् ॥

ततः कुम्भस्य पूर्णपात्रोपरि सप्तदर्भनिर्मिते कूर्चे विष्वक्सेनं पीताक्षतैरावाह्य पूजयेत्–

आवाहयामि सेनेशं शंखचक्रगदाधरम् ।
अतसीपुष्पसंकाशं पीतवाससमच्युतम् ॥
एहि मे देवदेवेश भक्तरक्षणतत्पर ।
गजाननादिसहितः सूत्रवत्या सह प्रभो ॥
ॐ ह्रां ह्रूं ह्रौं विष्वक्सेनाय नमः ।

इत्यावाह्य, ॐ सूत्रवतीसहिताय श्रीविष्वक्सेनाय नमः, अर्घ्यं समर्पयामि, एवं पाद्याचमन–स्नान–वस्त्रोपवीत–चन्दनपुष्प-धूप–दीप–नैवेद्यपुनराचमनताम्बूलदक्षिणाप्रदक्षिणादीनि समर्प्य प्रणमेत्–

ॐ विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व पृथिवीमुत द्याम् । मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकं मघवा सूरिरस्तु ॥

विष्वक्सेन नमस्तेऽस्तु सर्वेषां च शुभप्रद ।
पुष्पाञ्जलिं मया दत्तां गृहाण गणनायक ॥

इति संपूज्य विष्वक्सेनं परितोऽष्टदिक्षु तत्पार्षदानावाह्य पूजयेत्

ईशाने-ॐ गं गजाननाय नमः इति गजाननमावाह्य पूजयेत् ।		
आग्नेये– ॐजं जयत्सेनाय नमः, इति	,,	,,
नैऋते-ॐ हं हरिमुखाय नमः, इति	,,	,,
वायव्ये-ॐ कं कालप्रकृतये नमः, इति	,,	,,
पूर्वे-ॐ बं बलाय नमः इति	,,	,,
दक्षिणस्यां-ॐ प्रं प्रबलाय नमः, इति	,,	,,
पश्चिमायां-ॐ विं विनायकाय नमः, इति	,,	,,
उत्तरे-ॐ विं विघ्नेशाय नमः, इति	,,	,,

ततोऽञ्जलिं बद्ध्वा प्रार्थयेत्–

ॐ विष्वक्सेनाय विद्महे वेत्रहस्ताय धीमहि, तन्नः सेनेश प्रचोदयात्, इति ।

ततः सर्वान् प्रणमेत् (अथ पुण्याहवाचनेऽपि कर्तव्ये, अत्रैव कुर्यात्, केचित् नेच्छन्ति) ।

अथाऽपरसामग्र्या पूर्वोत्तरभागे शालग्रामरूपिणं सश्री

नारायणं पुरुषसूक्तविधिना[1] समाराधयेत् । तत्र–

भगवन् पितृयागार्थे प्रार्थये त्वां विशेषतः ।
तेषामनुग्रहार्थं च यागमाहर मेऽच्युत ॥

(बृ० ब्र० सं० अ० ४ पा० ४)

इति प्रार्थ्य, ब्राह्मणाः पुरुषसूक्तं पठेयुः, कर्ता समाराधयेत्, अष्टोत्तरशतनामभि[2]स्तुलसीं समर्प्य निराज्य प्रणमेच्च ।

अथ विश्वेदेवपूजनम्

पुरूरवार्द्रवसंज्ञकविश्वेदेवाः पूर्वाभिमुखाः कूर्चद्वये स्थाप्याः, तानावाह्य पूजयेत्–

ॐ विश्वेदेवाः शृणुतेम ँ हवं मे येऽअन्तरिक्षे यऽउपद्यविष्ठ । येऽअग्निजिह्वा उत वा यजत्राऽआसद्यास्मिन् बर्हिषि मादयध्वम् ॥

भो विश्वेदेवा ! इह व आवाहयामि, इमां पूजां स्वीकुरुध्वम् ।

अद्यामुकगोत्रस्य, अमुकनाम्नः, अस्मत्पितृस्वरूपिणो नारायणस्य समाराधनकर्मणि भो पुरूरवार्द्रवसंज्ञकविश्वेदेवाः हस्तप्रक्षालनार्थं व अर्घ्यं नमः । एवं पाद्याचमन-स्नानीय-वस्त्रोपवीत-गन्धपुष्पधूपदीपनैवेद्यपुनराचमनदक्षिणाताम्बूलादीनि दत्वा नमस्कुर्यात्–

१–परिशिष्टे द्रष्टव्यम् । २–परिशिष्टे द्रष्टव्यम् ।

आगता हि महाभागाः स्वागतं कृपया मयि ।
यावच्छ्राद्धं प्रवर्तेत तावत्संनिहिता ननु ॥ इति

अथापरं कर्मपात्रं विधाय कुशजलादिकमादाय–

ॐ अद्यामुकगोत्रस्य, अमुकनाम्नः अस्मत्पितुः, अस्मिन् श्राद्धकर्मणि वासुदेवादीनावाहयिष्ये, इत्युच्चार्य, पीताक्षतान् हस्ते, आदाय, आवाहयेत् ।

वासुदेवम्–

आवाहयाम्यहं देवं वासुदेवं जगत्पतिम् ।
अमृताध्मातमेघाभं विद्युत्सदृशवाससम् ॥
एह्येहि पुण्डरीकाक्ष शरणागतवत्सल ।
सर्वकामप्रदाचिन्त्यसर्वशक्तिबलान्वित ॥

एवं संकर्षणम्–

आवाहयाम्यहं देवं सङ्कर्षणमनामयम् ।
शशांकशतसंकाशं सजलाम्बुदवाससम् ॥
एहि संकर्षणाचिन्त्य देव भक्तजनप्रिय ।
वाङ्मनःकायसंभूत–मलत्रितयनाशन ॥

एवं प्रद्युम्नम्–

देवमावाहयाम्यद्य प्रद्युम्नमपराजितम् ।
दूर्वाङ्कुरदलश्यामं शशांकांशुसमाम्बरम् ॥

काम कामप्रद शान्त कमनीयगुणालय ।
प्रद्युम्नाभ्येहि देवेश प्रद्योतितचराचर ॥

एवमनिरुद्धम्–

आवाहयाम्यहं देवमनिरुद्धं जगद्गुरुम् ।
पद्मपत्राग्रसंकाशं रक्ताम्बरविभूषणम् ॥
अनिरुद्ध त्वमभ्येहि व्याप्तशेषचराचर ।
सर्वेषां प्राणिनां कर्मसाक्षीभूत परात्पर ॥

सर्वेषां ध्यानम्–

सर्वे चतुर्भुजा ध्येयाः शङ्खचक्रगदाधराः ।
किरीटकौस्तुभधरा वैनतेयासने स्थिताः ॥
प्रोद्यता इव चोद्धर्तुं प्राणिवृन्दं सनातनम् ।

अर्घ्यादिकं संपाद्य सव्येन देवतीर्थेन च पूजयेत्–

अद्य अमुकगोत्रस्य, अमुकस्य, मत्पितुरस्मिन् श्राद्धे वासुदेवादयः ! वः, अर्घ्यं नमः । एवं पाद्याचमने । एवञ्च स्नानवस्त्रोपवीतगन्धपुष्पधूपदीपनैवेद्यपुनराचमनताम्बूल–दक्षिणा–प्रदक्षिणा-नमस्कारान् वो नमः, इति सर्वं दत्वा, अत्र[1] जितंते इति पाठं कुर्यात् ।

१. जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥
इत्यादिस्तोत्रं परिशिष्टे द्रष्टव्यम् ।

अथाग्न्याधानम्

अथ होमवेदीं कुशद्वयेनोल्लिख्य, अनामिकाङ्गुष्ठाभ्यामुद्धृत्य, संप्रोक्ष्य होमवेद्यां यथासम्भवमग्निं संस्थापयेत् । शक्तश्चेदग्निस्थापनविधिना संस्कुर्यात्, न चेत्

अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे, देवाँऽआसादयादिह ।

इति वह्निं प्रज्वाल्य, प्रणमेत्–

त्वं मुखं सर्वदेवानां सप्तार्चिरमितद्युते ।
आगच्छ भगवन् वह्ने यज्ञेऽस्मिन् सन्निधो भव ॥

इति नमस्कृत्य अष्टदिक्षु पूर्वादिक्रमेण वसूनावाह्य पूजयेत्–

१– ॐ अग्नये नमः । २– ॐ जातवेदसे नमः । ३– ॐ सहोजसे नमः । ४– ॐ अजिराप्रभवे नमः । ५– ॐ वैश्वानराय नमः । ६– ॐ नर्यापसे नमः । ७– ॐ पंक्तिराधसे नमः । ८– ॐ विसर्पिणे नमः । समन्ततः– श्रीयज्ञपुरुषाय नमः । स्वशिरसि– ॐ आत्मने नमः । श्रीवैष्णवशिरःसु–सर्वेभ्यः श्रीवैष्णवेभ्यो नमः ।

ततः सर्वोपचारैः, अग्निं संपूज्य प्रार्थयेत्–

ॐ चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य । त्रिधो बद्धो वृषभो रोरवीति महो देवो मर्त्यां ३ आविवेश ॥ इति ।

अथ अग्नेरुत्तरतः पंक्तिद्वयाकारेण दर्भानास्तीर्य तत्र १५ पवित्रः प्रोक्षणीं, प्रणीतां, स्रुक्स्रुवौ चाऽधोमुखं स्थापयेत् ॥

दक्षिणे त्रिकुशासने ससावित्रीकं ब्रह्माणं पूजयेत्–

ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः । सबुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

ॐ सावित्रीसहिताय ब्रह्मणे नमः इति सर्वोपचारान् दत्वा प्रणमेत् । ततः पात्राणि उत्तानानि कृत्वा, उत्ताने प्रोक्षणीपात्रे प्रादेशमात्रौ साग्रौ द्वौ दर्भौ पवित्रीकृत्य, अद्भिरभ्युक्ष्य, प्रोक्षणीपात्रे निधाय तत्र पीताक्षतान् निक्षिपेत् । पवित्रान्तर्हिते प्रोक्षणीपात्रे; अपोनिनीय अग्नेर्दक्षिणतः समानीय मुखसममुद्धृत्य स्वस्य पुरतः स्थापयित्वा दक्षिणहस्ताङ्गुष्ठकनिष्ठिकाभ्यामुदग्रे पवित्रे गृहीत्वा ताभ्यां तदपः प्राक् त्रिरुत्पूय यज्ञपात्राणि त्रिः प्रोक्ष्य, इध्मविस्रस्य त्रिः प्रोक्षयेत् ।

पूर्णपात्रसंस्कारः–

द्वे पवित्रे पूर्णपात्रे निधाय, अङ्गुष्ठानामिकाभ्यां पूर्णपात्रं प्राक् त्रिरुत्पूय, अग्नेर्दक्षिणतः पूर्णपात्रं समानीय मुखसममुद्धृत्य ब्रह्मणः समीपे स्थापयित्वा दर्भैराच्छादयेत् ।

आज्यसंस्कारः–

आज्यस्थाल्यां द्वे पवित्रे निधाय, अग्नेः पश्चिमतः स्थितायामाज्यस्थाल्यां पवित्रान्तर्हितायामाज्यं निरूप्य, ऐशान्यामङ्गारेषु

निधाय, ज्वलता दर्भेणाऽवद्योतनं कृत्वा द्वे दर्भाग्रे नखादन्येनच्छित्वा प्रक्षाल्य; आज्यपात्रे निधाय पुनरपि ज्वलता दर्भेण त्रिरग्निं परिक्रम्य दर्भमेताभ्यां क्षिपेत् । आज्यं वह्नेरवतार्याऽङ्गारानग्नौ क्षिप्त्वा सपवित्रेण हस्तेन, अग्नेः प्रदक्षिणतः समानीय, स्वस्य पुरतः स्थापयित्वा, हस्तस्य, अङ्गुष्ठकनिष्ठिकाभ्यामुदग्रे पवित्रे गृहीत्वा, आज्यं त्रिरुत्पूय, अपद्रव्यं निरस्य, पवित्रग्रन्थिं विस्रस्य, अद्भिरभ्युक्ष्य प्रागग्रे पवित्रे वह्नौ प्रहरेत् ।

अथ चरुः—

गव्यसिद्धपायसाविचरु स्थाल्यां निरूप्य, संप्रोक्ष्य, ज्वलता दर्भेणाऽवद्योतनं कृत्वा पर्यग्निकरणं च कृत्वा, वह्नेर्दक्षिणतः समानीय, अग्नेः पश्चिमतः कुशेषु निधाय, कुशैराच्छादयेत् ।

ततः स्रुवं संस्कुर्यात्—

स्रुवमग्नौ प्रतप्य दर्भाग्रैः स्रुवाग्रं मध्येन मध्यं, मूलेन मूलं सर्वतः सुवलितं संमृज्य पुनः प्रतप्य संप्रोक्ष्य, अग्नेरुत्तरतः कुशेषु स्थापयेत् दर्भानग्नौ क्षिपेत् ।

कुशैः परिस्तरणम्—

ॐ अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम् ॥

ॐइषेत्वोर्जेत्वा वायवस्थो देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे ।

ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । निहोतासत्सिबर्हिषि ।

ॐ शन्नोदेवी रभीष्टयऽ आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ।

अथ परिषेचनम्—

ॐ अदिते अनुमन्यस्व, इत्यग्नेर्दक्षिणतः प्रागग्रां जलधारां दद्यात् । ॐ अनुमतेऽनुमन्यस्व, इति पश्चिमत उत्तराग्रां जलधारां दत्त्वा, ॐ सरस्वतेऽनुमन्यस्व, इत्युत्तरतः प्रागग्रां जलधारां दद्यात् । ॐ देवसवितः प्रसुव, इत्यग्नेः समन्ततो जलधारां दद्यात् ।

अथाग्नेर्वैष्णवीकरणम्—

अग्निमध्ये ऋतुस्नातया लक्ष्म्या सह भगवतः संयोगं, विचिन्त्य, समाहितगर्भां लक्ष्मीं ध्यात्वा, ततः, अग्नेरुत्पत्तिं भावयेत् । एतदेवाग्नेर्वैष्णवीकरणम् ।

अथाग्निसंस्काराः—

ॐ हुं नमः, अग्नये शुचिषदे नमः, गर्भाधानसंस्कारं संपादयामि स्वाहा, इति संस्कारनाम्ना घृतं जुहुयात् । एवं पुंसवन २, सीमन्तोन्नयन ३, जातकर्म ४, नामकरण ५, निष्क्रमण ६, अन्नप्राशन ७, चूडाकरण ८, कर्णवेध ९, उपनयन १०, गोदान विवाहाः १२ । एवं मूलमन्त्रेण, अवशिष्टसंस्कारं संपादयामि

स्वाहा। इति चतुर्वारं जुहुयात्।

अथ समिद्धोमः–

ततः पञ्चदशसमिध आज्येनाऽभ्यज्य, पुष्पाक्षतैरलङ्कृत्य स्वमलङ्कृत्य, ब्राह्मणमलङ्कृत्य – अस्मिन् होमकर्मणि ब्रह्मन् इध्म आधास्ये, इत्युक्ते, आधत्स्व, इत्यनुज्ञाते प्रजापतिं मनसा ध्यायन् तूष्णीं घृताक्ताः पञ्चदशसमिधो वह्नौ क्षिपेत्।

अथाज्यधारः–

ततः स्रुवेण आज्यमादाय– ॐ प्रजापतये स्वाहा, इति नैऋत्यादीशानान्तं जुहुयात्। प्रजापतये, इदं न मम, इति प्रणीतायां संस्रवं[1] निनयेत् ॥ १ ॥ एवमग्रेऽपि त्यागः। ॐ इन्द्राय स्वाहा, इति वायव्यादाग्नेयान्तं जुहुयात् ॥२॥ ॐ अग्नये स्वाहा, इति, अग्नेर्दक्षिणतो जुहुयात् ॥३॥ ॐ सोमाय स्वाहा, इत्यग्नेरुत्तरतो जुहुयात् ॥४॥

पुष्पाञ्जलिमादाय, अग्निं प्रार्थयेत्–

> चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
> हूयते च पुनर्द्वाभ्यां तस्मै ज्ञानात्मने नमः ॥

ततो मूलमन्त्रेण घृतपायसाभ्याम्, अष्टोत्तरशतवारं, इद-मन्त्रेण पञ्चविंशतिवारं द्वादशवारं वा जुहुयात्।

---

१. हुतशेषं जुहुयात्।

[illegible]। चतुर्विंशतिनामभिर्जुहुयात्–

			नमः	स्वाहा
१)	ॐ	केशवाय		
२)	"	नारायणाय	"	"
३)	"	माधवाय	"	"
४)	"	गोविन्दाय	"	"
५)	"	विष्णवे	"	"
६)	"	मधुसूदनाय	"	"
७)	"	त्रिविक्रमाय	"	"
८)	"	वामनाय	"	"
९)	"	श्रीधराय	"	"
१०)	"	हृषीकेशाय	"	"
११)	"	पद्मनाभाय	"	"
१२)	"	दामोदराय	"	"
१३)	"	वासुदेवाय	"	"
१४)	"	संकर्षणाय	"	"
१५)	"	प्रद्युम्नाय	"	"
१६)	"	अनिरुद्धाय	"	"
१७)	"	पुरुषोत्तमाय	"	"
१८)	"	अधोक्षजाय	"	"
१९)	"	नारसिंहाय	"	"
२०)	"	अच्युताय	"	"
२१)	"	जनार्दनाय	"	"
२२)	"	उपेन्द्राय	"	"

२३)	ॐ	हरये	नमः	स्वाहा
२४)	”	श्रीकृष्णाय	”	”

ॐ श्रीदेव्यै नमः स्वाहा, ॐ भूदेव्यै नमः स्वाहा, ॐ नीलादेव्यै नमः स्वाहा ।

अथ वैकुण्ठपार्षदहोमः—

१)	ॐ	आधारशक्त्यै	नमः	स्वाहा
२)	”	प्रकृत्यै	”	”
३)	”	अखिलजगदाधाराय कूर्मरूपिणे नारायणाय	”	”
४)	”	अनन्ताय नागराजाय	”	”
५)	”	भूम्यै	”	”
६)	”	वैकुण्ठाय दिव्यलोकाय	”	”
७)	”	वैकुण्ठाय दिव्यजनपदाय	”	”
८)	”	वैकुण्ठाय दिव्यनगराय	”	”
९)	”	वैकुण्ठाय दिव्यविमानाय	”	”
१०)	”	आनन्दमयाय दिव्यमण्डपरत्नाय	”	”
११)	”	आस्तरणरूपिणेऽनन्ताय नागराजाय	”	”
१२)	”	धर्माय पीठपादाय	”	”
१३)	”	ज्ञानाय पीठपादाय	”	”
१४)	”	वैराग्याय पीठपादाय	”	”
१५)	”	ऐश्वर्याय पीठपादाय	”	”

१६)	ॐ	ऋग्वेदाय पीठवाहकाय	नमः	स्वाहा
१७)	”	यजुर्वेदाय पीठवाहकाय	”	”
१८)	”	अथर्ववेदाय पीठवाहकाय	”	”
१९)	”	सामवेदाय पीठवाहकाय	”	”
२०)	”	अधर्माय पीठगात्राय	”	”
२१)	”	अज्ञानाय पीठगात्राय	”	”
२२)	”	अवैराग्याय पीठगात्राय	”	”
२३)	”	अनैश्वर्याय पीठगात्राय	”	”
२४)	”	एभिः परिच्छिन्नतनवे सत्त्वसत्त्वात्मकाय पीठभूताय नागराजाय	”	”
२५)	”	पीठस्योपरि, अष्टदलपद्माय	”	”
२६)	”	सोममण्डलाय	”	”
२७)	”	सूर्यमण्डलाय	”	”
२८)	”	वह्निमण्डलाय	”	”
२९)	”	विमलायै चामरकरायै	”	”
३०)	”	क्रियायै चामरकरायै	”	”
३१)	”	उत्कर्षिण्यै चामरकरायै	”	”
३२)	”	ज्ञानायै चामरकरायै	”	”
३३)	”	प्रह्व्यै चामरकरायै	”	”
३४)	”	सत्यायै चामरकरायै	”	”
३५)	”	ईशानायै चामरकरायै	”	”
३६)	”	योगायै चामरकरायै	”	”
३७)	”	अनुग्रहायै चामरकरायै	”	”

३८)	ॐ	जगत्प्रकृतये योगपीठवाहकाय	नमः	स्वाहा
३९)	"	सहस्रशीर्ष्णे अनन्ताय	"	"
४०)	"	पुरतः पादपीठाय	"	"
४१)	"	भगवत्पादुकाभ्यां	"	"
४२)	"	अस्मद्गुरुभ्यो	"	"
४३)	"	अस्मत्परमगुरुभ्यो	"	"
४४)	"	अस्मत्सर्वगुरुभ्यो	"	"
४५)	"	श्रीमते रामानुजाय	"	"
४६)	"	पूर्णमिश्राय	"	"
४७)	"	श्रीमद्यामुनमुनये	"	"
४८)	"	श्रीराममिश्राय	"	"
४९)	"	श्रीपुण्डरीकाक्षाय	"	"
५०)	"	श्रीमन्नाथमुनये	"	"
५१)	"	श्रीमते शठकोपाय	"	"
५२)	"	श्रीमते विष्वक्सेनाय	"	"
५३)	"	श्रियै	"	"
५४)	"	श्रीधराय	"	"
५५)	"	सुदर्शनाय हेतिराजाय	"	"
५६)	"	पाञ्चजन्याय शङ्खाधिपतये	"	"
५७)	"	कौमोदक्यै गदाधिपतये	"	"
५८)	"	नन्दकाय खड्गाधिपतये	"	"
५९)	"	शार्ङ्गाय चापाधिपतये	"	"
६०)	"	श्रीवत्साय श्रीनिवासाय	"	"

६१)	ॐ	कौस्तुभाय सर्वरत्नाधिपतये	नमः	स्वाहा
६२)	"	वैजयन्त्यै वनमालायै	"	"
६३)	"	ह्रीं पुष्ट्यै	"	"
६४)	"	ऐं सरस्वत्यै	"	"
६५)	"	द्रां निद्रायै	"	"
६६)	"	क्लीं कान्त्यै	"	"
६७)	"	कं पृथिव्यै	"	"
६८)	"	गं गरुडाय	"	"
६९)	"	किरीटाय मुकुटाधिपतये	"	"
७०)	"	किरीटमालायै आपीडात्मिकायै	"	"
७१)	"	मकराकृतिकुण्डलाभ्यां	"	"
७२)	"	कण्ठिकाभरणाय	"	"
७३)	"	श्रीमत्तुलस्यै	"	"
७४)	"	हाराय सर्वाभरणाधिपतये	"	"
७५)	"	काञ्चीगुणोज्ज्वलाय पीताम्बराय	"	"
७६)	"	सर्वेभ्यो भगवद्भूषणेभ्यो	"	"
७७)	"	सर्वेभ्यो भगवद्दिव्यायुधेभ्यो	"	"
७८)	"	सर्वाभ्यो भगवत्पादसंवाहिनीभ्यो	"	"
७९)	"	सर्वेभ्यो भगवत्परिकरेभ्यो	"	"
८०)	"	अनन्ताय	"	"
८१)	"	विष्वक्सेनाय	"	"
८२)	"	सूत्रवत्यै	"	"
८३)	"	जं जयत्सेनाय	"	"

८४)	ॐ	गं गजाननाय	नमः	स्वाहा
८५)	"	हुं हयाननाय	"	"
८६)	"	कं कालप्रकृतिसंज्ञाय	"	"
८७)	"	सर्वेभ्यो विष्वक्सेनपरिजनेभ्यो	"	"
८८)	"	चण्डाय	"	"
८९)	"	प्रचण्डाय	"	"
९०)	"	भद्राय	"	"
९१)	"	सुभद्राय	"	"
९२)	"	जयाय	"	"
९३)	"	विजयाय	"	"
९४)	"	धात्रे	"	"
९५)	"	विधात्रे	"	"
९६)	"	कुमुदाय सायुधाय सपरिवाराय सशक्तिकाय	"	"
९७)	"	कुमुदाक्षाय सायुधाय सपरिवाराय सशक्तिकाय	"	"
९८)	"	पुण्डरीकाय सा० स० स०	"	"
९९)	"	वामनाय सा० स० स०	"	"
१००)	"	शङ्कुकर्णाय सा० स० स०	"	"
१०१)	"	सर्पनेत्राय सा० स० स०	"	"
१०२)	"	सुमुखाय सा० स० स०	"	"
१०३)	"	सुप्रतिष्ठिताय सा० स० स०	"	"
१०४)	"	सर्वेभ्यो भगवद्गणाधिपतिभ्यो	"	"

१०५)	ॐ	नित्येभ्यो	नमः	स्वाहा
१०६)	"	मुक्तेभ्यो	"	"
१०७)	"	सिद्धेभ्यो	"	"
१०८)	"	समस्तपरिवाराय श्रीमते नारायणाय	"	"
१०९)	"	अस्मत्पितृपितामहप्रपितामहस्वरूपेभ्यः समस्तपरिवारविशिष्टेभ्योऽनिरुद्धप्रद्युम्नसंकर्षणवासुदेवेभ्यो	"	"

अथ गोघृतेन स्विष्टकृद्धोमः–

ॐ यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् ।
अग्निष्टत्स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु ।।

ॐ अग्नये स्विष्टकृते स्वाहा । अग्नये स्विष्टकृते इदं न मम । ॐ भूः स्वाहा, अग्नये इदं न मम । ॐ भुवः स्वाहा, वायवे इदं न मम । ॐ स्वः स्वाहा, सूर्याय इदं न मम ।

ॐ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः । यजिष्ठोवह्नितमः शोशुचानो विश्वाद्वेषा ंसि प्रमुमुग्ध्यस्मत् ।।

ॐ अग्निवरुणाभ्यां स्वाहा इदं० ।

ॐ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठो अस्याऽउषसो व्युष्टौ । अवयक्ष्व नो वरुण ँ रराणो वीहि मृडीक

ॐ सुहवो नऽएधि ।

ॐ अग्निवरुणाभ्यां स्वाहा, इदं० ।

ॐ अयाश्चाग्नेस्यनभि शस्ति पाश्च सत्यमित्व मयाऽअसि । अयानो यज्ञं वहास्य यानो धेहि भेषज ँ स्वाहा ।

ॐ अग्नये अयसे स्वाहा, इदं० ।

ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नो अद्य सवितो, तद्विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः ।।

ॐ वरुणाय स्वाहा, इदं० । ॐ सवित्रे स्वाहा । ॐ विष्णवे स्वाहा । ॐ विश्वेभ्यो देवेभ्यः स्वाहा । ॐ मरुद्भ्यः स्वाहा ।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम ँ श्रथाय । अथावयमादित्यव्रते तवानागसोऽअदितये स्याम ।।

ॐ आदित्यायादितये स्वाहा, इदं ।

ततः पूर्णाहुतिः–

ततः स्रुवाज्येन स्रुचं चतुःकृत्वः पूरयित्वा, तत्र च ताम्बूल-पुगीफलनारिकेलं रक्तवस्त्राच्छादितं विधाय, गन्धपुष्पादिभिः संपूज्य ब्रह्माणं च संपूज्य, तस्मै पूर्णपात्रं दत्वा ब्रह्माणमलंकृत्य स्वश्चालंकृत्योत्तिष्ठन् यज्ञपुरुषं मनसा ध्यायन्–

ॐ पूर्णः पश्चादुतपूर्णः पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवाऽअधिसंवसन्त उत्तमे नाकऽइह माद-यन्ताम् । ॐ सप्त ते अग्ने समिधः सप्त जिह्वा सप्त ऋषयः सप्त धामप्रियाणि । सप्त होत्रा सप्तधा त्वां यजन्ति सप्त योनि रापृणस्व घृतेन ।

ॐ अग्नये पूर्णाय समभते स्वाहा, इदं० । इति पूर्णाहुतिं जुहुयात् ।

अथ परिषेचनम्–

जलपूर्णप्रणीतां दक्षिणहस्तेनाऽऽदाय–ॐ अदितेऽनुमन्यस्व, इति कुण्डस्य दक्षिणतः प्राचीनम् । ॐ सरस्वतेऽनुमन्यस्व, इत्यु-त्तरतः प्राचीनम् । ॐ देवसवितः प्रसुव, इति प्रागारभ्य प्रदक्षिण-क्रमेण सर्वतो जलधारयाग्नि परिषिञ्चेत् ।। प्रणीतापात्रं स्वस्य पुरतो निधाय तस्मिन्–

ॐ सर्वसि सन्मे भूयाः सर्वमसि सर्वं मे भूयाः । पूर्णमसि पूर्णं मे भूया अक्षतमसि मामेक्षेष्ठाः ।

इति जलान्तरं निनीय, प्रणीतापात्रं हस्ताभ्यामादाय–

ॐ देवा ऋषयो मार्जयन्ताम्–इति प्राच्यां किञ्चिज्जलं निरस्य ॐ मासाः पितरो मार्जयन्ताम्–इति दक्षिणस्यां जलं निरस्य ॐ गृहा पशवो मार्जयन्ताम् इति प्रतीच्याम् जलं निरस्य, ॐ आप ओषधयो वनस्पतयो मार्जयन्ताम्–इति–उत्तरे जलं

निरस्य, ॐ यज्ञः संवत्सरो यज्ञपतिर्मार्जयन्ताम्–इति मन्त्रेण ऊर्ध्वायां दिशि जलं निरस्य, पुरस्तात्सहिरण्यं किञ्चिज्जलं भूमौ निरस्य, तज्जलेनाऽऽत्मानम्–ॐ सुमित्रायान आप ओषधयः सन्तु, इति सम्प्रोक्ष्य प्रणीतान्युब्जीकुर्यात्–

ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यं च वयं द्विष्मः । इति ।

ततो [1]दशदिक्पालबलिदानं कृत्वा–"ॐ ब्रह्मणे नमः" इति गन्धादिभिः पूजयित्वा, ब्रह्माणं विसर्जयेत्–

ॐ स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाताः । आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्वा प्रयातु ब्रह्मलोकम् । इति ।

ततः परिधीनास्तरणकुशांश्चादाय वह्नौ प्रक्षिपेत्–

ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत ।
अरिष्टास्माकं वीरामापरासेचिमत्पयम् ।। इति ।

सर्वदेवविसर्जनं तु समाप्त्यैव । हस्ते पीताक्षतानादाय हवने आवाहितदेवविसर्जनं कुर्यात्–

१. इन्द्र, अग्नि, यम, निऋति, वरुण, वायु, कुबेर, ईश, ब्रह्मा, अनन्त इति दश दिक्पालाः । एतेषां पूर्वादिक्रमेण ब्रह्मानन्तयोश्च, ऊर्ध्वमधश्च पूजनम् भवति ।

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सह सूक्तवाकः, सर्वा वीरस्तं जुषस्व स्वाहा ।

अथार्घादिदानम्

यजमानोऽर्घ्यादिकं संपादयेत्–

यजमानेन– भो ब्राह्मण ! अर्घ्यादिकं संपादयिष्ये, इत्युक्ते ब्राह्मणाः संपादय, इति वदेयुः । मूलमन्त्रेण, अर्घ्यादिकं कुर्यात् ।

अथ विश्वेदेवादीनामग्रे पत्रपुटकादौ, अर्घ्यादिकं दद्यात् । अथ पुरतश्चतुष्कोणं मण्डलं कृत्वा, तत्र सजलोपस्करसिद्धान्नादिकं (भूस्वाम्यादि) निधाय, सव्येनैव सजलान्नादिकमादाय सोपस्करं सजलमिदमन्नादिकं भूस्वामिस्वरूपिणे नारायणाय नमः, इति मण्डले जलकुशादिकं भूमावुत्सृजेत् ।

अथ विश्वेदेवानां पुरतः चतुष्कोणमण्डलं कृत्वा सोपस्कर-मन्नादिकं विभज्य शुद्धपात्रादौ निधाय, अर्घ्यादिकमादाय–

'अद्यामुकगोत्रस्य अमुकस्य अस्मत्पितुरस्मिन् श्राद्धे पुरूरवार्द्रवसंज्ञकविश्वेदेवा एतदर्घ्यादिकं वो नमः' इति दत्वा अन्नशुद्ध्यर्थं पुरुषसूक्तं पठेत् ।

ततोऽन्नं दद्यात् विश्वेदेवानां पुरतः–

अद्यामुकगोत्रस्य, अमुकस्य, अस्मिन् श्राद्धे भगवदात्मकपुरु-

रक्षार्थसंज्ञकविश्वेदेवाः, एतत् सव्यञ्जनं हव्यं वो नमः, इति ।

अथ वासुदेवादीनां पुरतः सोपस्करं अन्नादिकं विभज्य अर्घ्यादिकमादाय–

अद्यामुकगोत्रा अमुकामुकनामानः सपत्नीका अस्मत्पितृपितामहप्रपितामहस्वरूपाः प्रद्युम्नसंकर्षणवासुदेवाः अर्घ्यपाद्याचमनादीनि वो नमः, इति दत्वा, एवं मातामहादिभ्योऽपि दद्यात् । अथान्नादिकं स्पृशन्–

ॐ पृथ्वी ते पात्रं द्यौ रपिधानं ब्राह्मणस्य मुखे अमृते ऽमृतं जुहोमि स्वाहा ।

[1]इत्यालभ्य,

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं समूढस्य पा ँसुरे ।

ततो मण्डले तिलान् विकीर्य, मूलं जपित्वा, तिलकुशानादाय, सजलान्नादिकं स्पृशन्–

अद्यामुक गोत्राय अमुकनाम्नेऽ स्मत्पितृस्वरूपाय प्रद्युम्नाय इदमन्नादिकं ते नमः । एवं पितामहादिभ्योऽपि तत्तत्पुरतो दद्यात् ततः आचमनादिकं कारयित्वा प्रार्थयेत्–

1 स्पृष्ट्वा ।

प्रद्युम्नसंकर्षणकवासुदेवस्वरूपकाः ।
पितापितामहश्चैव तथैव प्रपितामहः ॥
गन्धपुष्पादिकं सर्वं स्वीकुरुध्वं स्वधा हि वः ।
इदमर्घ्योदकं दिव्यं तुलसीदलमिश्रितम् ॥
इदं पुष्पादिकं सर्वं स्वीकुरुध्वं नमोऽस्तु वः । इति

अथ पिण्डदानम्

तत्र वार्षिकादिमरणतिथौ व्यूहानां पुरतः एकैकः पिण्डो देयः । पार्वणादौ तेषामेव पुरतः पित्रादिस्वरूपेभ्यः, मातामहादिस्वरूपेभ्यश्च तेभ्यो देयाः । अन्यच्च स्वश्रद्धानुकूलं देयम् ।

तत्र प्रद्युम्नादीनां पुरतश्चतुरस्रां प्रत्येकवेदीं कृत्वा, तत्र त्रिभिर्दर्भैः परिसमूह्य, गोमयोदकेनोपलिप्य, दर्भमूलेन दक्षिणोत्तरक्रमेण तिस्रो रेखा उल्लिख्य, अनामिकाङ्गुष्ठाभ्यामुल्लेखनक्रमेण मृदमुद्धृत्य ऐशान्यां क्षिपेत्, शुद्धजलेन प्रोक्षयेत्, इति कृत्वा, तत्र कुशानास्तीर्य, पुष्पाणि निक्षिपेत् । ततः शुद्धगोदुग्धेन निर्मितं गोघृतयुतं सुकोमलं पिण्डीकरणोपयोगि च पायसं सम्पाद्य, तद्द्वारा, यथासंख्याकान् पिण्डान् निर्माय, पृथक् स्थापयेत् । (ततः किञ्चित् दीर्घं लम्बायमानं षडङ्गुलकं विकरं कृत्वा, पुटके निधाय जलेन आप्लाव्य अपसव्येन–

ये चाप्यस्मत्कुले जाताः कनिष्ठां गतिमाश्रिताः ।
ते इमं चान्नमादाय गच्छन्तु स्वर्गतिं सुखम् ॥

इति नैऋत्यां किञ्चिद्दूरे दद्यात् । उक्तञ्च–

स्वयोन्यां परबीजं यत् परयोन्या स्वबीजकम् ।
तदेव विकरं नाम नैऋत्यां च षडङ्गुलम् ॥)

अथ सव्येन हस्तपादशुद्धिं कृत्वा, आचम्य च कार्याणि कुर्यात् ।

अथ वेद्यां तिलान् विकीर्य–

श्राद्धभूमिं गयां ध्यात्वा ध्यात्वा देवं जनार्दनम् ।
देशिकेन्द्रं गुरुं ध्यात्वा ततः श्राद्धं प्रवर्तये ॥

इति वदेत् । ततः कौशमासनं दद्यात्–

अद्यामुकगोत्रा अमुकामुकनामानः अस्मत्पित्राद्यात्मक प्रद्युम्नादय एतानि कौशेयानि, आसनानि वो नमः ।

अथ अर्घ्यादिकम्–

अद्यामुकगोत्रा अमुकामुकनामानः, अस्मत्पित्राद्यात्मक प्रद्युम्नादयो व एषोऽर्घ्यः, एतत्पाद्यम्, एतदाचमनीयम्, एतानि धूपदीपतुलसीदलादीनि संपद्यन्ताम् न मम, इति दद्यात् ।

अथ सकुशजलपिण्डानादाय तत्तत्पुरतो वेद्यां दद्यात्–

अद्य, अमुकगोत्रामुकनामन् अस्मत्पित्रात्मक प्रद्युम्न एष पिण्डस्ते स्वाहा नमः । एवं पितामहप्रपितामहाभ्यामपि दद्यात्

[illegible] जलमादाय– "वः इदं अन्नं न मम" इति दत्वा [illegible] । पुनः । अर्घ्यपात्रस्थगन्धपुष्पतुलसीदलादीनि पिण्डोपरि [illegible], तीर्थोदकेन पिण्डान् स्नापयित्वा, शुद्धवस्त्रेण आच्छादयेत्–

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय, नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मै तद्वः पितरो वास आधत्त । इति ।

ततः

ॐ उद्वयं तमसस्परिस्वः पश्यन्तऽउत्तरम् । देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।

इति मन्त्रेण कर्पूरेण निराजनं कृत्वा पिण्डस्याऽऽच्छादित-वस्त्रोपरि–

कायेन वाचा मनसेन्द्रियैर्वा,
बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै,
नारायणायेति समर्पयामि ॥

[illegible] दक्षिणां दद्यात् । ततः पुष्पाण्यादाय प्रार्थयेत्–

नमो विष्णुपदस्थेभ्यः स्वधा वः पितरो नमः ।
हरये पितृनाथाय, अग्निसोमात्मने नमः ।

ससोमपात्मने विष्णो नमो बर्हिषदात्मने ।
आसंसाराभिजनका अग्निष्वात्ता तथाच्युत ॥
पितामहाः सोमपास्त्वं त्वमन्ये प्रपितामहाः ।
तुभ्यं नमो भगवते पितृमूर्तेऽच्युताय च ॥
नारायणाय हंसाय विष्णो त्रिपुरुषात्मने ।
मुक्त्वा त्वामेव भगवन् न नमाम्यर्चयामि च ॥
न तर्पयामि विश्वेश नाऽन्यमावाहयाम्यहम् ।

इति पिण्डदानम्

★

अथ तर्पणम्

कर्मपात्रोदकमादाय देशकालादीन् संकीर्त्य– अद्यामुकगोत्रस्य (गोत्राणां वा) अमुकनाम्नः पित्रादेः, अस्मिन् श्राद्धदिने भगवदात्मकदेवर्षिपितृतर्पणं करिष्ये– इति संकल्प्य हेमरौप्यादिपात्रे गन्धपुष्पतुलसीदलानि निक्षिप्य, शुद्धजलं पूरयित्वा, मूलमन्त्रं स्मृत्वा, पतनाधारपात्रं निधाय, पीताक्षतगन्धपुष्पादिना पात्रे देवानावाहयेत् । तत्र– ॐ सश्रीकं नारायणं तत्पार्षदान् देवर्षींश्च आवाहयामि, इत्युक्त्वा– ॐ सहस्रशीर्षेति०, पुरुष एवेति० मन्त्रद्वयं, च पठित्वा–

ॐ विश्वेदेव ासऽआगत शृणुताम‍ऽइम ँ हवम् । एदम्बर्हि निषीदत ॥ ॐ विश्वेदेवाः शृणुतेम ँ हवम्मे येऽअन्तरिक्षे यऽउपद्यविष्ठा ये अग्नि जिह्वाऽउतवा यजत्रा

[illegible] बर्हिषि मादयध्वम् ।

इति मन्त्रद्वयं च पठेत् ।

ततः– प्राङ्मुखः सन् मूलमन्त्रेण दशवारं श्रीमन्नारायणं तर्पयामि, इत्युक्त्वा तर्पयेत् ।

ततः ॐ भूस्तर्पयामि । ॐ भुवस्तर्पयामि । ॐ स्वस्तर्पयामि । ॐ भूर्भुवः स्वस्तर्पयामि । इति तर्पयेत् ।

ततः चतुर्विंशतिव्यूहान् तर्पयेत्–

१	ॐ सश्रीकं	केशवं	तर्पयामि
२	”	नारायणं	”
३	”	माधवं	”
४	”	गोविन्दं	”
५	”	विष्णुं	”
६	”	मधुसूदनं	”
७	”	त्रिविक्रमं	”
८	”	वामनं	”
९	”	श्रीधरं	”
१०	”	हृषीकेशं	”
११	”	पद्मनाभं	”
१२	”	दामोदरं	”
१३	”	वासुदेवं	”
१४	”	संकर्षणं	”

१५	ॐ सश्रीकं	प्रद्युम्नं	तर्पयामि
१६	,,	अनिरुद्धं	,,
१७	,,	पुरुषोत्तमं	,,
१८	,,	अधोक्षजं	,,
१९	,,	नारसिंहं	,,
२०	,,	अच्युतं	,,
२१	,,	जनार्दनं	,,
२२	,,	उपेन्द्रं	,,
२३	,,	हरिं	,,
२४	,,	श्रीकृष्णं	,,

ततो वैकुण्ठपार्षदान् तर्पयेत्—

१	ॐ	आधारशक्तिं	तर्पयामि
२	,,	प्रकृतिं	,,
३	,,	अखिलजगदाधारं कूर्मरूपिणं नारायणं	,,
४	,,	अनन्तं नागराजं	,,
५	,,	भूमिं	,,
६	,,	वैकुण्ठं दिव्यलोकं	,,
७	,,	वैकुण्ठं दिव्यजनपदं	,,
८	,,	वैकुण्ठं दिव्यनगरं	,,
९	,,	वैकुण्ठं दिव्यविमानं	,,
१०	,,	आनन्दमयं दिव्यमण्डपरत्नं	,,
११	,,	आस्तरणरूपिणम् अनन्तं नागराजं	,,

१२	ॐ	धर्मं पीठपादं	तर्पयामि
१३	,,	ज्ञानं पीठपादं	,,
१४	,,	वैराग्यं पीठपादं	,,
१५	,,	ऐश्वर्यं पीठपादं	,,
१६	,,	ऋग्वेदं पीठवाहकं	,,
१७	,,	यजुर्वेदं पीठवाहकं	,,
१८	,,	अथर्ववेदं पीठवाहकं	,,
१९	,,	सामवेदं पीठवाहकं	,,
२०	,,	अधर्मं पीठगात्रं	,,
२१	,,	अज्ञानं पीठगात्रं	,,
२२	,,	अवैराग्यं पीठगात्रं	,,
२३	,,	अनैश्वर्यं पीठगात्रं	
२४	,,	एभिः परिच्छिन्नतनु सदासत्मकं पीठमूले	,,
		नागराजं	,,
२५	,,	पीठस्योपरि, अष्टदलपद्मं	,,
२६	,,	सोममण्डलं	,,
२७	,,	सूर्यमण्डलं	,,
२८	,,	वह्निमण्डलं	,,
२९	,,	विमलां चामरकरां	,,
३०	,,	क्रियां चामरकरां	,,
३१	,,	उत्कर्षिणीं चामरकरां	,,
३२	,,	ज्ञानां चामरकरां	,,
३३	,,	प्रह्वीं चामरकरां	

३४ ॐ सत्यां चामरकरां तर्पयामि
३५ ,, ईशानां चामरकरां ,,
३६ ,, योगां चामरकरां ,,
३७ ,, अनुग्रहां चामरकरां ,,
३८ ,, जगत्प्रकृतिं योगपीठवाहिकां तर्पयामि
३९ ,, सहस्रशीर्षाणम्, अनन्तं ,,
४० ,, पुरतः पादपीठं ,,
४१ ,, भगवत्पादुके ,,
४२ ,, अस्मद्गुरून् ,,
४३ ,, अस्मत्परमगुरून् ,,
४४ ,, अस्मत्सर्वगुरून् ,,
४५ ,, श्रीमद्रामानुजं ,,
४६ ,, श्रीपूर्णमिश्रं ,,
४७ ,, श्रीमद्यामुनमुनिं ,,
४८ ,, श्रीराममिश्रं ,,
४९ ,, श्रीपुण्डरीकाक्षं ,,
५० ,, श्रीमन्तं नाथमुनिं ,,
५१ ,, श्रीमन्तं शठकोपं ,,
५२ ,, श्रीमन्तं विष्वक्सेनं ,,
५३ ,, श्रियं ,,
५४ ,, श्रीधरं ,,
५५ ,, श्रीसुदर्शनं हेतिराजं ,,
५६ ,, पाञ्चजन्यं शंखाधिपतिं

५७ ॐ कौमोदकीं गदाधिपतिं तर्पयामि
५८ ,, नन्दकं खड्गाधिपतिं ,,
५९ ,, शार्ङ्गं चापाधिपतिं ,,
६० ,, श्रीवत्सं श्रीनिवासं ,,
६१ ,, कौस्तुभं सर्वरत्नाधिपतिं ,,
६२ ,, वैजयन्तीं वनमालां ,,
६३ ,, ह्रीं पुष्टीं ,,
६४ ,, ऐं सरस्वतीं ,,
६५ ,, ह्रां निद्रां ,,
६६ ,, क्लीं कान्तिं ,,
६७ ,, कं पृथिवीं ,,
६८ ,, गं गरुडं ,,
६९ ,, किरीटं मुकुटाधिपतिं ,,
७० ,, किरीटमालाम्, आपीडात्मिकां ,,
७१ ,, मकराकृतिकुण्डले ,,
७२ ,, कण्ठिकाभरणं ,,
७३ ,, श्रीमत्तुलसीं ,,
७४ ,, हारं सर्वाभरणाधिपतिं ,,
७५ ,, काञ्चीगुणोज्वलं पीताम्बरं ,,
७६ ,, सर्वाणि भगवद्भूषणानि ,,
७७ ,, सर्वान् भगवद्दिव्यायुधान् ,,
७८ ,, सर्वा भगवत्पादसंवाहिनीः ,,
,, सर्वान् भगवत्परिकरान्

			तर्पयामि
८०	ॐ	अनन्तं	"
८१	"	विष्वक्सेनं	"
८२	"	सूत्रवतीं	"
८३	"	जं जयत्सेनं	"
८४	"	गं गजाननं	"
८५	"	हं हयाननं	"
८६	"	कं कालप्रकृतिसंज्ञं	"
८७	"	सर्वान् विष्वक्सेनपरिजनान्	"
८८	"	चण्डं	"
८९	"	प्रचण्डं	"
९०	"	भद्रं	"
९१	"	सुभद्रं	"
९२	"	जयं	"
९३	"	विजयं	"
९४	"	धातारं	"
९५	"	विधातारं	"
९६	"	कुमुदं सायुधं सपरिवारं सशक्तिकं	"
९७	"	कुमुदाक्षं सा. स. स.	"
९८	"	पुण्डरीकं सा. स. स.	"
९९	"	वामनं सा. स. स.	"
१००	"	शंकुकर्णं सा. स. स.	"
१०१	"	सर्वनेत्रं सा. स. स.	"
१०२	"	सुमुखं सा. स. स.	"

			तर्पयामि
१०३	ॐ	सुप्रतिष्ठितं सा. स. स.	"
१०४	"	सर्वान् भगवद्गणाधिपतीन्	"
१०५	"	नित्यान्	"
१०६	"	मुक्तान्	"
१०७	"	विष्यान्	"
१०८	"	समस्तपरिवारं श्रीमन्नारायणं	
१०९	"	अस्मत्पितृपितामहप्रपितामहात्मकान् सर्वपरिवारविशिष्टान्, अनिरुद्धप्रद्युम्नसङ्कर्षण-वासुदेवान् तर्पयामि ।	इति ।

अथ यवतीर्थमिश्रितजलेन ब्रह्मादीन् तर्पयेत्—

१	ॐ	ब्रह्माणं	तर्पयामि	११	ॐ	पुलस्त्यं	तर्पयामि
२	"	विष्णुं	"	१२	"	पुलहं	"
३	"	भवतं	"	१३	"	क्रतुं	"
४	"	दक्षं	"	१४	"	वसिष्ठं	"
५	"	भृगुं	"	१५	"	परमेष्ठिनं	"
६	"	धर्मं	"	१६	"	विवस्वन्तं	"
७	"	यमं	"	१७	"	सोमं	"
८	"	मरीचिं	"	१८	"	कर्दमं	"
९	"	अङ्गिरसं	"	१९	"	क्रोधं	"
१०	"	अत्रिं	"	२०	"	विक्रीतं	"

अथ निवीती[1] कायतीर्थेन दद्यात्–

१ ॐ ऋषीन्	तर्पयामि	१७ ॐ व्यासं	तर्पयामि
२ ,, महर्षीन्	,,	१८ ,, आश्वलायनं शौनकं	,,
३ ,, ब्रह्मर्षीन्	,,	१९ ,, प्रणवं	,,
४ ,, देवर्षीन्	,,	२० ,, व्याहृतीः	,,
५ ,, राजर्षीन्	,,	२१ ,, सावित्रीं	,,
६ ,, श्रुतर्षीन्	,,	२२ ,, गायत्रीं	,,
७ ,, सप्तर्षीन्	,,	२३ ,, छन्दांसि	,,
८ ,, काण्डर्षीन्	,,	२४ ,, ऋग्वेदं	,,
९ ,, ऋषीकान्	,,	२५ ,, यजुर्वेदं	,,
१० ,, ऋषिपत्नीः	,,	२६ ,, सामवेदं	,,
११ ,, ऋषिपुत्रान्	,,	२७ ,, अथर्वाङ्गिरसं	,,
१२ ,, काण्वं बोधायनं	,,	२८ ,, इतिहासपुराणे	,,
१३ ,, आपस्तम्बं सूत्रकारं	,,	२९ ,, सर्वदेवान्	,,
१४ ,, सत्याषाढं हिरण्यकेशिनं	,,	३० ,, सर्वदेवजनान्	,,
१५ ,, वाजसनेयिनं	,,	३१ ,, सर्वभूतानि	,,
१६ ,, याज्ञवल्क्यं			

अथ पितॄनावाहयेत् पीताक्षतैः–

ॐ आयान्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः । अस्मिन् यज्ञे स्वधया मदन्तोऽधि

1— यज्ञोपवीतस्य मालाकारत्वम् ।

[illegible] ॥ इति ।

[illegible] तर्पयेत्–

अद्यामुकगोत्रममुकनामानं मम पित्रात्मकं प्रद्युम्नस्वरूपिणं [illegible] तर्पयामि, इत्युच्चार्य–

ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः [illegible]। । असुं यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु पितरो [illegible] ॥

इति प्रथमाञ्जलिं दद्यात् ।

ॐ अङ्गिरसो नः पितरो नवग्वाऽअथर्वाणो भृगवः [illegible]: तेषां वय ँ सुमतौ यज्ञियानामपि भद्रे सौमनसे [illegible] ॥

इति द्वितीयाञ्जलिं दद्यात् ।

ॐ आयान्तु नः पितरः सोम्यासोऽग्निष्वात्ताः [illegible]र्देवयानैः । अस्मिन् यज्ञे स्वधया मदन्तोऽपि [illegible] तेऽवन्त्वस्मान् ॥

इति तृतीयाञ्जलिं दद्यात् ।

[illegible] पितामहं तर्पयेत्–

अद्यामुकगोत्रामुकनामानं मम पितामहात्मकं संकर्षणस्व-[illegible] भगवन्तं तर्पयामि, इत्युच्चार्य–

ॐ ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् । स्वधास्थ तर्पयत मे पितॄन् ॥

इति प्रथमाञ्जलिं दद्यात् ।

ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः । पितामहेभ्यः स्वधायिभ्यः स्वधा नमः । प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्षन्न पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् ।

इति द्वितीयाञ्जलिं दद्यात् ।

ॐ ये चेह पितरो ये च नेह याँश्च विद्मयाँ२ उ च न प्रविद्म । त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञ सुकृतञ्जुषस्व ॥

इति तृतीयाञ्जलिं दद्यात् ।

अथ प्रपितामहं तर्पयेत्-

अद्यामुकगोत्रममुकनामानं मम प्रपितामहात्मकं वासुदेवस्वरूपिणं भगवन्तं तर्पयामि, इत्युच्चार्य-

ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ।

इति प्रथमाञ्जलिं दद्यात् ।

ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ँ रजः । मधु द्यौरस्तु नः पिता ।

इति द्वितीयाञ्जलिं दद्यात् ।

ॐ मधुमान्नो व्वनस्पतिर्मधुमाँऽअस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥

इति तृतीयाञ्जलिं दद्यात् ।

अथ मातरं तर्पयेत्-

अद्यामुकगोत्राममुकनाम्नीं मम मातृस्वरूपां सत्यां तर्पयामि, इत्युच्चार्य-

ॐ आमा व्वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे । आमा गन्तां पितरा मातरा चामा सोमो-ऽमृतत्वेन गम्यात् ॥

इत्यञ्जलित्रयं दद्यात् ।

अथ पितामहीं तर्पयेत्-

अद्यामुकगोत्राममुकनाम्नीं मम पितामहीस्वरूपां हिरण्यां तर्पयामि, इत्युच्चार्य- अञ्जलित्रयं दद्यात् । मन्त्रः- मातृवत् ।

अथ प्रपितामहीं तर्पयेत्-

अद्यामुकगोत्राममुकनाम्नीं मम प्रपितामहीस्वरूपाम् हरिणीं तर्पयामि, इत्युच्चार्य, अञ्जलित्रयं दद्यात् । मन्त्रः मातृवत् ।

अथ मातामहं तर्पयेत्–

अद्यामुकगोत्रममुकनामानं मातामहात्मकं प्रद्युम्नस्वरूपिणं भगवन्तं तर्पयामि, इत्युच्चार्य–

ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्तसतो वः पितरो देष्मै तद्वः पितरो वासः आधत्त ॥

इत्यञ्जलित्रयं दद्यात् ।

अथ प्रमातामहं तर्पयेत्–

अद्यामुकगोत्रममुकनामानं प्रमातामहात्मकं संकर्षणस्वरूपिणं भगवन्तं तर्पयामि, इत्युच्चार्य, नमो वः पितरो रसाय– इति मन्त्रेणाञ्जलित्रयं दद्यात्–

अथ वृद्धप्रमातामहं तर्पयेत्–

अद्यामुकगोत्रममुकनामानं वृद्धप्रमातामहात्मकं वासुदेवस्वरूपिणं भगवन्तं तर्पयामि, इत्युच्चार्य "नमो वः पितरो रसाय" इतिमन्त्रेणाञ्जलित्रयं दद्यात् ।

अथ मातामहीं तर्पयेत्–

अद्यामुकगोत्राममुकनाम्नीं मम मातामहीस्वरूपां सत्यां

तर्पयामि इत्युच्चार्य, अञ्जलित्रयं दद्यात् । मन्त्रः– मातृवत् ।

अथ प्रमातामहीं तर्पयेत्–

अद्यामुकगोत्राममुकनाम्नीं मम प्रमातामहीस्वरूपां हिरण्यां तर्पयामि, इत्युच्चार्य, अञ्जलित्रयं दद्यात् । मन्त्रः– मातृवत् ।

अथ वृद्धप्रमातामहीं तर्पयेत्–

अद्यामुकगोत्राममुकनाम्नीं मम वृद्धप्रमातामहीस्वरूपां देवीं तर्पयामि, इत्युच्चार्य, अञ्जलित्रयं दद्यात् । मन्त्रः– मातृवत् ।

ततो गुर्वादिभ्यः, देहसम्बन्धिभ्यः, आत्मसम्बन्धिभ्यश्च तर्पणे कृते– अथ भागवतानां चेत्तर्पणं सव्येनैव देवतीर्थेनैव च पूर्वाभिमुखेनोत्तराभिमुखेन वा दद्यात् । अभागवतानां तु, अपसव्येन पितृतीर्थेन दक्षिणाभिमुखेनैव दद्यात् ।

अथ प्राचीनावीती, भागवत्तीर्थेन दक्षिणाभिमुखः सन् तर्पयेत्–

१	ॐ	पितॄन्	स्वधा	नमस्तर्पयामि
२	"	पितामहान्	"	"
३	"	प्रपितामहान्	"	"
४	"	मातॄः	"	"
५	"	पितामहीः	"	"
६	"	प्रपितामहीः	"	"
७	"	मातामहान्	"	"
८	"	मातुः पितामहान्	"	"

९	ॐ	मातुः प्रपितामहान्	स्वधा	नमस्तर्पयामि
१०	,,	मातामहीः	,,	,,
११	,,	मातुः पितामहीः	,,	,,
१२	,,	मातुः प्रपितामहीः	,,	,,
१३	,,	आचार्यान्	,,	,,
१४	,,	आचार्यपत्नीः	,,	,,
१५	,,	गुरून्	,,	,,
१६	,,	गुरुपत्नीः	,,	,,
१७	,,	सखीन्	,,	,,
१८	,,	सखिपत्नीः	,,	,,
१९	,,	ज्ञातीन्	,,	,,
२०	,,	ज्ञातिपत्नीः	,,	,,
२१	,,	अमात्यान्	,,	,,
२२	,,	अमात्यपत्नीः	,,	,,
२३	,,	सर्वान्	,,	,,
२४	,,	सर्वाः	,,	,,

ततः स्वाभीष्टान् 'ताताम्बे'[1] त्यादिश्लोकोक्तान् सम्बन्धि-

---

१. तथा च श्लोकः
ताताम्बात्रितयं सपत्नजननी मातामहादित्रयम्,
सस्त्रि स्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः ।
ताताम्बात्मभगिन्यपत्यधवयुग् जायापिता सद्गुरुः,
शिष्याप्ताः पितरो महालयविधौ तीर्थे तथा पार्वणे ॥

[illegible]येत् ।

ततो निम्नश्लोकैस्तर्पयेत्–

आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥
पितृवंशे मृता ये च मातृवंशे तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः ॥
ते तृप्तिमखिला यान्तु ये चास्मत्तोयकांक्षिणः ।
ये बान्धवाऽबान्धवा वा येऽन्यजन्मनि बान्धवाः ॥
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः ।
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ।
जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः ॥
ते तृप्तिमखिला यान्तु मद्दत्तेनाम्बुनाखिलाः ।
नरकेषु समस्तेषु यातनासु च ये स्थिताः ॥
तेषामाप्यायनायैतद् दीयते सलिलं मया ।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥
आब्रह्मभुवनांल्लोकानिदमस्तु तिलोदकम् ।
यत्र क्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनाम् ॥
आब्रह्म भुवनाल्लोकान्निदमस्ति तिलोदकम् ।

अथ पीताक्षतैर्विसर्जनम्–

ॐ ऊर्ज्जं वहन्ती रमृतं घृतं पयः कीलालं परि-

स्रुतम् । स्वधास्थ तर्पयत मे पितॄन् । तृप्यत तृप्यत इति ।

अथापसव्येन भूमौ वस्त्रनिष्पीडनम्–

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

अथ पवित्रविसर्जनं कर्तव्यम् ।

ततः सव्यं कृत्वा– 'ॐ भूर्भुवः स्वः सर्वेभ्यो नमः' इति सर्वान् नमस्कृत्य, मूलं जपन् सूर्यार्घ्यं दद्यात् ।

ततः सूर्योपस्थानम्–

ॐ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतं बृहत् ।

अथ सूर्यं नमस्कुर्यात्–

ॐ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।

परितो नमस्कुर्यात्–

ॐ सर्वदिक्पालाद्यन्तर्यामिणे श्रीमन्नारायणाय नमः ।

अथ जलकरेण मुखं विमृज्यात्–

ॐ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन । त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ।

अथानामिकाङ्गुष्ठाभ्यां चक्षुःस्पर्शं कुर्यात्–

ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ।

अथ पीताक्षतान् तर्पणपात्रे विसृजेत्–

ॐ देवा गातु विदो गातुं वित्त्वा गातुमित । मनसस्पतऽइमं देवयज्ञꣳ स्वाहा वातेधाः ॥ इति ।

ततः– "कायेन वाचेति" समर्पणम् कुर्यात् ।

यदक्षरपदभ्रष्टं मात्राहीनं च यद् भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद पुरुषोत्तम ॥ इति च पठेत् ।

॥ इति तर्पणम् ॥

अथ महाभागवताऽऽराधना (तदीयाराधना)

महाभागवतब्राह्मणाम् हस्तपादादिशुद्धिं कारयित्वा, शुभा-

सने स्थापयित्वा पीताक्षतपुष्पाण्यादाय कर्ता– "अद्यामुकगोत्रा अमुकामुकनामान अस्मत्पितृपितामहप्रपितामहात्मकाः प्रद्युम्नादिस्वरूपाः भो ? महाभागवताचार्याः यो यथोपचारैरर्चयिष्ये" इति प्रार्थयेत् । ततः, "अर्चय" इत्यनुज्ञाते, पादेषु पुष्पाक्षतान् समर्प्य, प्रणम्य, अर्घ्यपाद्यादिकं दत्वा, वस्त्रालंकारान् समर्प्य, उत्तराभिमुखान् ब्राह्मणान् कर्ता पूर्वाभिमुखः सन् पुरुषसूक्तविधिना पूजयेत्। तत्र– (१) आवाहनम् (२) आसनम् (३) अर्घ्यम् (४) पाद्यम् (५) आचमनम् (६) वस्त्रम् (७) यज्ञोपवीतम् (८) चन्दनम् (९) पुष्पम् (१०) धूपम् (११) दीपम् इत्येतान्, उपचारान् समर्पयेत् । ततो ब्राह्मणान् गृहीत्वा भोजनासने पूर्वोत्तराभिमुखान्, उपवेशयेत् । भूमौ मण्डलोपरि कदलादीनां सपूर्णाग्राः पत्रावलीः निक्षिप्य, पात्रप्रोक्षणं कृत्वा, शस्त्र[1]मन्त्रेण, अन्नादिकं च प्रोक्षयेत् ।

तथा हि– वृ. ब्र. सं. पा. ४ अ. ४ ।

प्रोक्षयेदस्त्रमन्त्रेण भक्तं सुव्यञ्जनान्वितम् ॥११३॥
सर्वं संसाधितं किञ्चिद्भक्ष्याभ्यादिभोजनम् ।
चेतसा कल्पयेद् सर्वं पितृणां तृप्तये तु तत् ॥११४॥
अस्त्रेण प्रणवेनैव पात्राणि क्षालयेत् क्रमात् ॥११५॥

अथ ब्राह्मणा यावत्परिवेषणं पितृसूक्तादिपठनपूर्वकं मूलं जपेयुः ।

तथा हि– वृ. ब्र. सं. पा. ४ अ. ४ ।

१ — ॐ सुदर्शनाय ज्वलितराजाय अस्त्राय हूँ फट् ।

जपेयुर्द्विजास्तावद् वैष्णवाः स्वासनेषु च ॥११६॥
परिवेषणं तु यावत्स्यात् सूक्तानि हरितुष्टये ॥११७॥ इति

कर्ता क्रमेण परिवेषणं कुर्यात् । प्रथमतो भोक्तुर्दक्षिणभागे लवणादीनि निधाय ततो दधिक्षीरान्नं पानं गुडान्नं घृतपक्वान्नं शाकम्, अवलेह्यादिकं घृतं व्यञ्जनम्, अपूपं फलम् एवं क्रमेण परिवेष्य, यस्य यस्य यद् यद् इष्टं शास्त्रीयं तत्तद् दद्यात् । ततो तत्तत्तीर्थं तुलसीं च दत्वा गायत्रीं स्मरन् परिषेचनाय जलं दद्यात् । ततो ब्राह्मणान् परिषिच्य, आचमनाय जलं गृहीत्वा "ॐ अमृतोपस्तरणमसि" इत्याचमेत् । ततः प्राणाहुतिमन्त्रपूर्वकं तान् महाप्रसादमपि भोजयेत् । शनैः शनैर्भोजयन् कठवल्लीं विष्णुसहस्रनामादिकं च पठेत् । ततस्तृप्तिं ज्ञापयित्वा हस्तौ संपुटीकृत्य– "भो ? अस्मत्पितृभूतभागवतात्मकाः भागवताचार्याः तृप्ताः स्थ" इत्युक्त्वा, ते "तृप्ताः स्म" इत्युक्ते, उत्तरापोशनं "ॐ अमृतपिधानमसि" इत्युक्त्वा दद्यात् । ततः शेषान्नं किं कर्तव्यमिति पृच्छेत्, "इष्टैः सह भुज्यताम्" इति वदेयुः । ततो हस्तान् गृहीत्वोत्थाप्य हस्तपादादिशुद्धिं कारयेत् । ततः शुभासनेषु, उपवेश्य दक्षिणाताम्बूलादिभिः सत्कुर्यात् । श्रीपादतीर्थग्रहणयोग्यत्वे तद् गृहीत्वा, गन्धपुष्पादिभिः संपूज्य प्रार्थयेत्–

समस्तसंपत्समवाप्तिहेतवः, समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः, पुनन्तु मां ब्राह्मणपादपांसवः ॥इति॥

१ — चरणोदकम् ।

तत आशीर्वादं प्रार्थयेत् ।

दातारो नोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो माव्यगमद् बहुदेयं च नोऽस्तु ॥ इति ॥

ततो ब्राह्मणाः—

दातारो वोऽभिवर्द्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च वो माव्यगमद् बहुदेयञ्च वोऽस्तु ॥ इति वदेयुः ॥

अथ पिण्डविसर्जनम्—

ॐ वाजे वाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः । अस्यमध्वः पिबत मादयध्वम् । तृप्ता यात पथिभिर्देवयानैः ।

इति विप्रान् प्रणम्य विसर्जयेत् । ततो बालवृद्धादिभ्यो दत्वा सबन्धुकः स्वयं भुञ्जीत । तद्रात्रौ भूमौ शयीत ।

श्री हरेः प्रेरणावश लिखिता श्राद्धपद्धतिः ।
प्रभवेदुपकाराय वैष्णवानां निरन्तरम् ॥

वृन्दावनवास्तव्यश्रीमद्भागवतरहस्यज्ञश्रीमत्सुदर्शनसूरि—(शुक्लाचार्यः) चरणचञ्चरीकेण, दक्षिणदेशवास्तव्यश्रीमद्गोपालार्यकृपालब्धोभयवेदान्तरहस्यकेन, कौण्डिन्येन, श्रीपराङ्कुशाचार्येण सङ्कलिता पितृयागपद्धतिः, नयनद्वयखाक्षिमिते (२०२२) वैक्रमवत्सरे श्रावणमासे सम्पूर्णा ।

□

श्रीः

श्रीमते रामानुजाय नमः

श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः

परिशिष्टम्

श्रीपितृयागविधौ प्रमाणसंग्रहः

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
यस्य द्विरदवक्त्राद्याः पारिषद्याः परःशतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

श्रीवैष्णवश्राद्धं पार्वणे—एकोद्दिष्टे[1]च पार्वणविधिना कार्यम्—
(वृ. हा. [2]स्मृ. अ. ६)

प्रत्यब्दं पार्वणश्राद्धं मातापित्रोर्मृतेऽहनि ॥१५२॥
अर्चयित्वाऽच्युतं भक्त्या पश्चात् कुर्याद् विधानतः ।
वैष्णवानेव विप्रांस्तु सर्वकर्मसु योजयेत् ॥१५३॥

सपिण्डोत्तरकालिकाऽऽब्दिकपार्वणादिश्राद्धेषु कर्ता चतुर्व्यू-

१— मरणतिथौ । २— सर्वत्राऽपि वृद्धहारीतस्मृतेः श्लोकसंख्याः "ज्ञानखण्डाश्रमाद्" मुद्रितस्मृतेः सन्ति ।

हान् संस्थाप्य स्वयम्, अनिरुद्धप्रतिनिधिः सन् वासुदेवादी पूजयेत्–

(वृ. ब्र. सं. पा. ४ अ. ४)

प्रद्युम्नादिधिया पुत्रस्त्वनिरुद्धः स्वयं यजेत् ।
पितरो हि हरिः साक्षात् चतुर्व्यूहात्मकस्तु यः ॥
पितरः सर्वभूतानामस्माकं च मुने स्वयम् ।
भगवान् वासुदेवो हि मूलप्रकृतिरुच्यते ॥ ७ ॥
पिताऽहमस्य जगतो धाता माता पितामहः ॥ ९ ॥
दैवे पित्र्ये च भगवान् संपूज्यः परमिच्छताम् ॥११॥
नास्ति तस्मात्परोऽन्यो हि पितामाताऽथवा द्विज ॥२४॥
पिता पितामहश्चाथ प्रपितामह एव च ॥२५॥
तदन्तर्यामियजनं वैष्णवानां निरूपितम् ॥२७॥

गृहस्थवैष्णवानामत्तिवार्यत्वम्–

वैष्णवानां गृहस्थानां धर्मोऽयं पारमार्थिकः ॥३६॥
ज्ञानिनां तु फलं त्वेकं निर्दिष्टं दैवपित्र्ययोः ॥३९॥
दैवे साक्षाद्धरिः पूज्यः शङ्खचक्रगदाधरः ।
अन्तर्यामिधिया पित्र्ये पूज्यः पित्रादिरूपतः ॥५१॥
वैष्णवानां विशेषोऽयं दैवे पित्र्ये च कर्मणि ।
पशुघातो न कर्तव्यो मुन्यन्नेन परागतिः ॥५४॥

ब्राह्मणाः–

न श्राद्धे ह्यामिषं देयं पितृणां च कदाचन ।
न चाऽऽमिषाशिनः पित्र्ये यष्टव्याः श्राद्धकर्मणि ॥५५॥
वैष्णवैः सततं पूज्या वैष्णवा ब्राह्मणा द्विजाः ।
न च मांसाशिनः शैवाः शाक्ताश्चापि ह्यवैदिकाः ॥५६॥
अनूर्ध्वपुण्ड्रिणः शंखचक्रलाञ्छनवर्जिताः ।

भगवन्तं समाराध्य, अग्निहोमं विधाय श्राद्धमारभेत्–

(वृ. ब्र. सं. पा. ४ अ. ४)

पूजयित्वा पुरादेवं तर्पयित्वा हुताशनम् ।
प्रयुक्तेन विधानेन ततस्त्वाहूय वैष्णवान् ॥८१॥
प्रक्षालिताङ्घ्रीन् स्वाचान्तान् प्रोक्षितेनास्त्रवारिणा ।
रात्रौ स्त्रीसङ्गरहितान् विष्णुसूक्तप्रपाठकान् ॥८२॥

ब्राह्मणसंख्या यथासम्भवम्–

(वृ. ब्र. सं. पा. ४ अ. ४)

पित्रादेर्वैष्णवाः प्रोक्ताश्चत्वारो वैश्वदेविकाः ।
द्वौ वाऽपि दैविके प्रोक्ता वेकैको वा न दोषभाक् ॥९३॥

वैष्णवपितरः–

सर्वे चतुर्भुजा ज्ञेयाः शङ्खचक्रगदाधराः ॥९७॥
वैष्णवानां हि पितरो न वै नरकवासिनः ॥१००॥

ते पितृलोकेऽपि न सन्ति–

पितृलोके न ते सन्ति परमैकान्तिनो हि ते ॥१०१॥
साक्षाद् वैकुण्ठनाथस्य द्वारदेशावलम्बिनः ॥१०२॥

स्वरूपञ्च तेषाम्–

प्रद्युम्नसंकर्षणकवासुदेवस्वरूपकाः ।
पितापितामहश्चैव तथैव प्रपितामहः ॥१०३॥

वैष्णवानां श्राद्धकरणे विधिः, अकरणे प्रत्यवायश्च–

(बृ. हा. अ. ११)

कुर्यात् श्राद्धं विधानेन विष्णोराज्ञामनुस्मरन् ॥३२७॥
न कुर्याद् यो विधानेन पितृयज्ञं नराधमः ।
आज्ञातिक्रमणाद् विष्णोः पतत्येव न संशयः ॥३२८॥
प्रत्यब्दं पार्वणश्राद्धं कुर्यात् पित्रोर्मृतेऽहनि ।
अन्यथा वैष्णवो याति ब्रह्महत्यां न संशयः ॥३२९॥
तैस्तैर्मन्त्रैः प्रकर्तव्यमन्तर्यामिधिया तथा ।
प्रद्युम्नादिधिया पुत्रस्त्वनिरुद्धः स्वयं यजेत् ॥१३४॥

वैष्णवैर्देवकार्यवत् कार्यम्–पितृकार्यमपि–

वैष्णवानां गृहस्थानां कर्तव्यं दैवकर्मवत् ।
इदं तु वैष्णवं श्राद्धं मुन्यन्नेनैव वर्तयेत् ॥१३५॥

अवैष्णवानामिव न भवति वैष्णवानामयं श्राद्धविधिः–

(बृ. ब्र. सं. पा. ४ अ. ४)

वैष्णवानां विशेषोऽयं पित्र्ये कर्मणि वर्तते ॥५२॥

दैवकर्मेव श्राद्धं कर्तव्यं वैष्णवैः–

वैष्णवानां गृहस्थानां कर्तव्यं दैवकर्मवत् ।

वैष्णवपुत्रं विना, अवैष्णवपितॄणां क्रन्दनम्–

तारयिष्यति नः पातात् विना श्रीवैष्णवान् सुतान् ।
अस्माभिरर्जिते पुण्ये क्षयं जाते च कः पुनः ॥४१॥

वैष्णवतायाश्च्युतस्यापि वैष्णवेष्ट्या प्रायश्चित्तं कुर्यात्–

(बृ. हा. अ. १०)

वैष्णवत्वाच्च्युतस्यापि कारयेदिष्टिमुत्तमाम् ॥ इत्यादि

कुलस्य वैष्णवपुत्रेण वैष्णवेष्ट्या वैष्णवीकरणम्–

उद्दिश्यावैष्णवान् स्वस्वपितॄनपि च वैष्णवः ।
यः कुर्याद् वैष्णवीमिष्टिं भक्त्या परमया युतः ।१६०।
वैष्णवत्वं कुलं सर्वं लभेतास्य न संशयः ॥१६१॥

सात्त्विकश्रुतिस्मृतिसिद्धं धर्मं यो न करोति स निन्दितः–

(बृ. हा. स्मृ. अ. ११)

श्रुतिस्मृत्युदितं धर्मं यस्त्यजेद् वैष्णवाऽधमः ।
स पाषण्डीति विज्ञेयः सर्वलोकेषु गर्हितः ॥१६८॥

समस्तयज्ञभोक्तारं ज्ञात्वा विष्णुं सनातनम् ।
दैवं पित्र्यं तथा यज्ञं कुर्यान्न तु परित्यजेत् ॥७१॥

एतद् विध्यनुसारमेव पूर्ववैष्णवैर्दैवपितृकर्म कृतम्–

वैशिष्ट्यं पारमैकान्त्यमेतच्छास्त्रं ममाव्ययम् ।
भारद्वाजादयः सर्वे नृपाश्च जनकादयः ॥३५२॥
योगिनः सनकाद्याश्च नारदाद्याः सुरर्षयः ।
वसिष्ठाद्या वैष्णवाश्च विष्वक्सेनादयः सुराः ॥३५३॥
एतच्छास्त्रानुसारेण पूजयामासुरीश्वरम् ।
परमं वैदिकं शास्त्रमेतद् वैष्णवमुत्तमम् ॥३५४॥
महाभागवतानां हि कर्तव्यमिदमुत्तमम् ।
स्वरूपेणैव धर्मस्य त्यागे हानि भवेद् ध्रुवम् ॥३५५॥

श्राद्धे निषिद्धानि–

(बृ. ब्र. सं. अ. ४ पा. ४)

नाऽऽमिषं न मधु प्रोक्तं खड्ग-पात्रं न चैव हि ॥१३६॥

एकादश्यां निषेधः–

नैकादश्यां प्रकर्तव्यं न तिर्यक्पुण्ड्रधारणम् ॥१३६॥

(बृ. ब्र. पा. ४ अ. ४)–

विष्णुशेषेण यष्टव्याः पितरो द्वादशीदिने ।

अन्यथा निरयं यान्ति पितरो येऽस्य जन्मदाः ॥५३॥

(बृ. हा. अ. ११)–

पित्रोः श्राद्धं प्रकुर्वीत नैकादश्यां द्विजोत्तमः ।
द्वादश्यां तत्प्रकुर्वीत नोपवासदिने क्वचित् ॥३३१॥

तेषामेव विधिश्चायं तापादिपञ्चसंस्कारवतामेव नान्येषाम् । तेषामेव महाभागवतत्वात्[1]–

अर्थपञ्चकतत्त्वज्ञाः पञ्चसंस्कारसंस्कृताः ।
आकारत्रयसंपन्ना महाभागवताः स्मृताः ॥
चक्रलाञ्छनहीनेन वैष्णवत्वं न लभ्यते ।

अपि च श्राद्धादौ न सर्वाश्रिणो[2] द्रष्टव्या । होमान्ते पितृयागः

(बृ. ब्र. पा. ४ अ. ३)–

होमान्ते पितृयागः स्यात् प्रद्युम्नादिधिया द्विजाः ।

(अवैष्णवस्यापि) बृ. हा. अ. ६ श्लो. ४४८ ।

अवैष्णवान्वये[3] जातः कृत्वेष्टिं वैष्णवीं द्विजः ।
वैष्णवैः पञ्चसंस्कारैः संस्कृतो वैष्णवो भवेत् ॥
नाऽवैष्णवो व्रजेन्मुक्तिं बहुशास्त्रश्रुतोऽपि वा ॥ इति ।

१. वैष्णवत्वात् । २. पुरोहिताः । ३. पञ्चसंस्कारेणैव स्वस्य वैष्णवत्वे वैष्णवान्वयपरिष्टिकरणं पित्रादिकुलार्थम् ।

पुरुषसूक्तम्

आवाहनम्– ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमि ँ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥
आसनम्– पुरुषऽएवेद ँ सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥
अर्घ्यम्– एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥ ३ ॥
पाद्यम्– त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥ ४ ॥
आचमनीयम्– ततो विराडजायत विराजोऽअधिपूरुषः ।
स जातोऽअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥
स्नानम्– तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ॥ ६ ॥
वस्त्रम्– तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दा ँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ७ ॥
यज्ञोपवीतम्– तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥
गन्धम्– तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्या ऋषयश्च ये ॥ ९ ॥

...वम्– यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत् किं बाहू किमूरू पादाऽउच्यते ॥१०॥
...पम्– ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्या ँ शूद्रोऽअजायत ॥११॥
...पम्– चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत ।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत ॥१२॥
...वेद्यम्– नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णोद्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ऽअकल्पयन् ॥१३॥
ताम्बूलम्– यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यङ्ग्रीष्म इध्मः शरद्धविः ॥१४॥
कर्पूरारार्तिक्यम्– सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः ।
देवा यद्यज्ञन्तन्वाना ऽ अबध्नन् पुरुषं पशुम् ॥१५॥
पुष्पाञ्जलिः– यज्ञेन यज्ञमयजन्त देवास्तानिधर्माणिप्रथमान्यासन् ।
तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याःसन्ति देवाः ॥१६॥

इति पुरुषसूक्तषोडशोपचारपूजनम् ।

श्री जितंतेस्तोत्रम्

जितं ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
परानन्द परब्रह्म नमस्ते चतुरात्मने ॥१॥
नमस्ते पीतवसने नमः कटकधारिणे ।
नमो नीलालकाबद्धवेणीसुन्दर पुङ्गव ॥२॥

स्फुरद्वलयकेयूरनूपुराङ्गदभूषणैः ।
शोभनैर्भूषिताकार कल्याणगुणराशये ॥३॥

करुणापूर्णहृदय शंखचक्रगदाधर ।
अमृतानन्दपूर्णाभ्यां लोचनाभ्यां विलोकय ॥४॥

कृशं कृतघ्नं दुष्कर्मकारिणं पापभाजनम् ।
अपराधसहस्राणामाकरं करुणाकर ॥५॥

कृपया मां केवलया गृहाण मधुराधिप ।
विषयार्णवमग्नं मामुद्धर्तुं त्वमिहार्हसि ॥६॥

पिता माता सुहृद्बन्धु भ्राता पुत्रस्त्वमेव मे ।
विद्याधनं च कामश्च नान्यं किञ्चित् त्वया विना ॥७॥

यत्र कुत्र कुले वासो येषु केषु भवोऽस्तु मे ।
तव दास्यैकभावे स्यात् सदा सर्वत्र मे रतिः ॥८॥

मनसा कर्मणा वाचा शिरसा वा कथञ्चन ।
त्वां विना नान्यमुद्दिश्य करिष्ये किञ्चिदप्यहम् ॥९॥

पाहि पाहि जगन्नाथ कृपया भक्तवत्सल ।
अनाथोऽहमधन्योऽहमकृतार्थो ह्यकिञ्चनः ॥१०॥

नृशंसः पापकृत् क्रूरो वञ्चको निष्ठुरः सदा ।
भवार्णवनिमग्नं मामनन्यकरुणानिधे ॥११॥

करुणापूर्णदृष्टिभ्यां दीनं मामवलोकय ।
त्वदग्रे पतितं त्यक्तुं तावकं नार्हसि प्रभो ॥१२॥

मया कृतानि पापानि त्रिविधानि पुनः पुनः ।
त्वत्पादपंकजं प्राप्तुं नान्यत् त्वत्करुणां विना ॥१३॥

साधनानि प्रसिद्धानि यागादीन्यब्जलोचन ।
त्वदाज्ञया प्रयुक्तानि त्वामुद्दिश्य कृतानि वै ॥१४॥

भवत्यैकलभ्यः पुरुषोत्तमो हि
जगत्प्रसूतिस्थितिनाशहेतुः ।
अकिञ्चनं नान्यगतिं शरण्यं,
गृहाण मां क्लेशिनमम्बुजाक्ष ॥१५॥

धर्मार्थकाममोक्षेषु नेच्छा मम कदाचन ।
त्वत्पादपङ्कजं साधो जीवितं दीयतां मम ॥१६॥

कामये तावकत्वेन परिचर्यासु वर्तनम् ।
नित्यं किंकरभावेन परिगृह्णीष्व मां विभो ॥१७॥

लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥१८॥

नित्यसिद्धैः समाकीर्णं तन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभैः ॥१९॥

वापीकूपतडागैश्च वृक्षखण्डैः सुमण्डितम् ।
अप्राकृतसुरै- र्वन्द्यमयुतार्कसमप्रभम् ॥२०॥

प्रकृष्टसत्त्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीडन्तं रमया सार्द्धं लीलाभूमिषु केशवम् ॥२१॥

मेघश्यामं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ।
उन्नसं चारुवदनं विम्बोष्ठं च शुभाननम् ॥२२॥

विशालवक्षसं श्रीशं कम्बुग्रीवं जगद्गुरुम् ।
आजानुबाहुपरिघमुन्नतांसं मधुद्विषम् ॥२३॥

तनूदरं निम्ननाभिमापीनजघनं हरिम् ।
करभोरुश्रियः कान्तं कदा द्रक्ष्यामि चक्षुषा ॥२४॥

शंखचक्रगदापद्मैरङ्कितं पादपङ्कजम् ।
शरच्चन्द्रशताकान्तं नखराजिविराजितम् ॥२५॥

सुरासुरै र्वन्द्यमानमृषिभि र्विदितं सदा ।
मूर्द्धानं मामकं देव तावकं मण्डयिष्यति ॥२६॥

कदा गम्भीरया वाचा श्रिया युक्तो जगत्पते ।
चामरव्यग्रहस्तं मामेवं कुर्विति वक्ष्यसि ॥२७॥

कदाहं राजराजेन गणनाथेन नोदितः ।
चरेयं भगवत्पादपरिचर्यानुवृत्तिषु ॥२८॥

शान्ताय सुविशुद्धाय तेजसे परमात्मने ।
नमः सर्वगुणातीतषाड्गुण्यायातिवेधसे ॥२९॥

सत्यज्ञानानन्तगुणब्रह्मणे चतुरात्मने ।
चतुःपञ्चनवव्यूहदशद्वादशमूर्त्तये ॥३०॥

नमोऽनन्ताय विश्वाय विश्वातीताय चक्रिणे ।
नमस्ते पञ्चकालज्ञ पञ्चकालपरायण ॥३१॥

पञ्चकालैकमनसां त्वमेव गतिरव्ययः ।
स्व महिम्नि स्थितं देवं निर्विकारं निरञ्जनम् ॥३२॥

अप्रमेयमजं विष्णुं शरणं त्वां गतोऽस्म्यहम् ।
गुणातीतं परं शान्तमब्जनाभं सुरेश्वरम् ॥३३॥

तुरीयाद्यतिरिक्तं त्वां कौस्तुभोद्भासिवक्षसम् ।
विश्वरूपं विशालाक्षं कदा द्रक्ष्यामि चक्षुषा ॥३४॥

मोक्षं सालोक्य सारूप्यं प्रार्थये न धराधर ।
इच्छामि हि महाभाग कारुण्यं तव सुव्रत ॥३५॥

सकलावरणातीत किङ्करोऽस्मि तवानघ ।
पुनः पुनः किङ्करोऽस्मि तवाहं पुरुषोत्तम ॥३६॥

आसनाद्यनुयागान्तमर्चनं यन्मया कृतम् ।
भोगहीनं क्रियाहीनं मन्त्रहीनमभक्तिकम् ॥३७॥

तत्सर्वं क्षम्यतां देव हीनं मामात्मसात्कुरु ।
इति स्तोत्रेण देवेशं स्तुत्वा मधुश्विघातिनम् ॥३८॥

यागावसानमध्ये देवदेवस्य चक्रिणः ।
नित्यं किङ्करभावेन स्वात्मानं विनिवेदयेत् ॥३९॥

इति श्रीपाञ्चरात्रागमे जितंतेस्तोत्रे प्रथमोऽध्यायः ॥१॥

जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१॥

विज्ञापनमिदं देव शृणुष्व पुरुषोत्तम ।
नरनारायणाभ्यां च श्वेतद्वीपनिवासिभिः ॥२॥

नारदाद्यैर्मुनिगणैः सनकाद्यैश्च योगिभिः ।
ब्रह्मेशाद्यैः सुरगणैः पञ्चकालपरायणैः ॥३॥

पूज्यसे पुण्डरीकाक्ष दिव्यैर्मन्त्रैर्महात्मभिः ।
पाषण्डधर्मसङ्कीर्णे भगवद्भक्तिवर्जिते ॥४॥

कलौ जातोऽस्मि देवेश सर्वधर्मबहिष्कृते ।
कथं त्वामसमाचारः पापप्रसवभूरहम् ॥५॥

अर्थयामि दयासिन्धो पाहि मां शरणागतम् ।
तापत्रयदवाग्नौ च दह्यमानं सदा विभो ॥६॥

पाहि मां पुण्डरीकाक्ष केवलं कृपया तव ।
जन्ममृत्युजराव्याधिदुःखसन्तप्तदेहिनम् ॥७॥

पालयाशु दृशा देव तव कारुण्यगर्भया ।
इन्द्रियाणि मया जेतुमशक्यं पुरुषोत्तम ॥
शरीरं मम देवेश व्याधिभिः परिपीडितम् ॥८॥

मनो मे पुण्डरीकाक्ष विषयानेव धावति ।
वाणी मम हृषीकेश मिथ्यापारुष्यदूषिता ॥९॥

एवं साधनहीनोऽहं किं करिष्यामि केशव ।
रक्ष मां कृपया कृष्ण भवाब्धौ पतितं सदा ॥१०॥

अपराधसहस्राणां सहस्रमयुतं तथा ।
अर्बुदं चाप्यसंख्येयं करुणाब्धे क्षमस्व मे ॥११॥

यच्चापराधं कृतवानज्ञानात् पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥१२॥

अज्ञत्वादल्पशक्तित्वादालस्याद् दुष्टभावनात् ।
कृतापराधकृपणं क्षन्तुमर्हसि मां विभो ॥१३॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व मधुसूदन ॥१४॥

यज्जन्मनः प्रभृति मोहवशङ्गतेन,
नानापराधशतमाचरितं मया ते ।
अन्तर्बहिश्च सकलं तव पश्यतोऽपि,
क्षन्तुं त्वमर्हसि हरे करुणावशेन ॥१५॥

कर्मणा मनसा वाचा या चेष्टा मम नित्यशः ।
केशवाराधने सा स्याज्जन्मजन्मान्तरेष्वपि ॥१६॥

इति श्री पाञ्चरात्रागमे जितन्तेस्तोत्रे द्वितीयोऽध्यायः ॥२॥

जितंते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१॥

नमस्ते वासुदेवाय शान्तानन्दचिदात्मने ।
अध्यक्षाय स्वतन्त्राय निरपेक्षाय शाश्वते ॥२॥

अच्युतायाविकाराय तेजसां निधये नमः ।
क्लेशकर्माद्यसंपृष्ट पूर्णषाड्गुण्यमूर्तये ॥३॥

त्रिभिर्ज्ञानबलैश्वर्यवीर्यशक्त्योजसां युगैः ।
त्रियुगाय नमस्तेऽस्तु नमस्ते चतुरात्मने ॥४॥

प्रधानपुरुषेशाय नमस्ते पुरुषोत्तम ।
चतुःपञ्चनवव्यहद्वादशाक्षरमूर्तये ॥५॥

अनेकमूर्तये तुभ्यममूर्तायैकमूर्त्तये ।
नारायण नमस्तेऽस्तु पुण्डरीकायतेक्षण ॥६॥

सुभ्रूललाट सुनस सुस्मिताधरविद्रुम ।
पीनवृत्तायतभुज श्रीवत्सकृतभूषण ॥७॥

तनुमध्यमहावक्ष पद्मनाभ नमोऽस्तु ते ।
विलासविक्रमाक्रान्त त्रैलोक्यचरणाम्बुज ॥८॥
नमस्ते पीतवसन स्फुरन्मकरकुण्डल ।
स्फुरत्किरीटकेयूर हारकौस्तुभभूषण ॥९॥
पञ्चायुध नमस्तेऽस्तु नमस्ते पञ्चकालिक ।
पञ्चकालाय ते कान्तयोगक्षेमावह प्रभो ॥१०॥
नित्यज्ञानबलैश्वर्य भोगोपकरणाच्युत ।
नमस्ते ब्रह्मरुद्रादिलोकयात्राप्रवर्तक ॥११॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥१२॥
अपि त्वां भगवन् ब्रह्मशिवशक्रमहर्षयः ।
द्रष्टुं वक्तुमभिष्टोतुमद्यापीश नहीशरे ॥१३॥
तापत्रयमहाग्राहभीषणे भवसागरे ।
मज्जतां नाथ नौरेषा प्रणतिस्तु त्वदर्पिता ॥१४॥
अनाथाय जगन्नाथ शरण्याशरणार्थिने ।
प्रसीद सीदते मह्यं मुह्यते भक्तवत्सल ॥१५॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यदर्चितम् ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥१६॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किङ्करोऽस्मि हृषीकेश भूयो भूयोऽस्मि किङ्करः ॥१७॥
एकत्रिचतुरत्यन्त चेष्टव्यूहाद्भातिस्यते ।
व्यक्तषाड्गुण्यचेष्टाय चतुरात्मात्मने नमः ॥१८॥

इति श्रीपाञ्चरात्रागमे जितन्तेस्तोत्रे तृतीयोऽध्यायः ॥३॥

जितन्ते पुण्डरीकाक्ष पूर्णषाड्गुण्यविग्रह ।
नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥१॥
देवानां दानवानां च सामान्यमधिदैवतम् ।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव ॥२॥
एकस्त्वमस्य लोकस्य स्रष्टा संहारकस्तथा ।
अध्यक्षश्चानुमन्ता च गुणमायासमावृतः ॥३॥
संसारसागरं घोरमनन्तक्लेशभाजनम् ।
त्वामेव शरणं प्राप्य निस्तरन्ति मनीषिणः ॥४॥
न ते रूपं न चाकारो नायुधानि न चास्पदम् ।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे ॥५॥
नैव किञ्चित् परोक्षन्ते प्रत्यक्षोऽसि न कस्यचित् ।
नैव किञ्चिदसाध्यं ते न चासिद्धोऽसि कर्हिचित् ॥६॥
कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमम् ।
योगिनां परमां सिद्धिं परमं ते पदं विदुः ॥७॥
अहं भीतोऽस्मि देवेश संसारेऽस्मिन् भयावहे ।
पाहि मां पुण्डरीकाक्ष न जाने शरणं परम् ॥८॥
कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत ।
शरीरे च गतौ चास्य वर्तते मे महद्भयम् ॥९॥
त्वत्पादकमलादन्यन्न मे जन्मान्तरेष्वपि ।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिम् ॥१०॥
विज्ञानं यदिदं प्राप्तं यदिदं ज्ञानमूर्जितम् ।
जन्मान्तरेपि देवेश मा भूदस्य परिक्षयः ॥११॥

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः ।
यदि नाशं न विन्देत तावतास्मि कृती सदा ॥१२॥
न कामकलुषं चित्तं मम ते पादयोःस्थितम् ।
कामये वैष्णवत्वं च सर्वजन्मसु केवलम् ॥१३॥
अज्ञानाद्यदि वा ज्ञानादशुभं यत्कृतं मया ।
क्षन्तुमर्हसि देवेश दास्येन च गृहाण माम् ॥१४॥
सर्वेषु देशकालेषु सर्वावस्थासु चाच्युत ।
किंकरोऽस्मि हृषीकेश भूयो भूयोऽस्मि किंकरः ॥१५॥
इत्येवमनया स्तुत्या स्तुत्वा देवं दिनेदिने ।
किंकरोस्मीति चात्मानं देवाय विनिवेदयेत् ॥१६॥
यश्चापराधं कृतवानज्ञानात्पुरुषोत्तम ।
अज्ञस्य मम देवेश तत्सर्वं क्षन्तुमर्हसि ॥१७॥
अहंकारार्थकामेषु प्रीतिरद्यैव नश्यतु ।
त्वां प्रपन्नस्य मे सैव वर्द्धतां श्रीमति त्वयि ॥१८॥
क्वाहमत्यन्तदुर्बुद्धिः क्व नु चात्महितेक्षणम् ।
यद्धितं मम देवेश तदाज्ञापय माधव ॥१९॥
सोऽहं ते देवदेवेश नार्चनादौ स्तुतौ न च ।
सामर्थ्यवान् कृपामात्रमनोवृत्तिःप्रसीद मे ॥२०॥
उपचारापदेशेन क्रियतेऽहर्निशं मया ।
अपचारानिमान् सर्वान्क्षमस्व पुरुषोत्तम ॥२१॥
न जाने कर्म यत् किञ्चिन्नापि लौकिकवैदिकौ ।
न निषेधविधीविष्णो तदा दासोऽस्मि केवलम् ॥२२॥

सत्त्वं प्रसीद भगवन् कुरु मय्यनाथे,
विष्णो कृपां परमकारुणिकःकिल त्वम् ।
संसारसागरनिमग्नमनन्तदीन-
मुद्धर्तुमर्हसि हरे पुरुषोत्तमोऽसि ॥२३॥

इति श्रीपाञ्चरात्रागमे जितन्तेस्तोत्रे चतुर्थोऽध्यायः ॥४॥

जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्तेऽस्तु हृषीकेश महापुरुष पूर्वज ॥१॥
नमस्ते वासुदेवाय शान्तानन्तचिदात्मने ।
अजिताय नमस्तुभ्यं षाड्गुण्यनिधये नमः ॥२॥
महाविभूतिसंस्थाय नमस्ते पुरुषोत्तम ।
सहस्रशिरसे तुभ्यं सहस्रचरणाय ते ॥३॥
सहस्रबाहवे तुभ्यं सहस्रनयनाय ते ।
अमूर्तये नमस्तुभ्यमेकमूर्त्ताय ते नमः ॥४॥
अनेकमूर्तय तुभ्यमक्षराय च ते नमः ।
व्यापिने वेदवेद्याय नमस्ते परमात्मने ॥५॥
चिन्मात्ररूपिणे तुभ्यं नमस्तुर्यादिमूर्तये ।
अणिष्ठाय स्थविष्ठाय महिष्ठाय च ते नमः ॥६॥
वरिष्ठाय वसिष्ठाय कनिष्ठाय नमो नमः ।
नेदिष्ठाय दविष्ठाय क्षेपिष्ठाय च ते नमः ॥७॥
पञ्चात्मने नमस्तुभ्यं सर्वान्तर्यामिणे नमः ।
कलाषोडशरूपाय सृष्टिस्थित्यन्तहेतवे ॥८॥

नमस्ते गुणरूपाय गुणरूपानुवर्तिने ।
व्यस्ताय च समस्ताय समस्तव्यस्तरूपिणे ॥९॥
लोकयात्राप्रसिद्ध्यर्थं सृष्टब्रह्मादिरूपिणे ।
नमस्तुभ्यं नृसिंहादिमूर्तिभेदाय विष्णवे ॥१०॥
आदिमध्यान्तशून्याय तद्वते च नमो नमः ।
प्रणवप्रतिपाद्याय नमः प्रणवरूपिणे ॥११॥
विपाकैः कर्मभिः क्लेशैरस्पृष्टवपुषे नमः ।
नमो ब्रह्मण्यदेवाय तेजसां निधये नमः ॥१२॥
नित्यसाधारणानेकलोकरक्षापरिच्छदे ।
सच्चिदानन्दरूपाय वरेण्याय नमो नमः ॥१३॥
यजमानाय यज्ञाय यष्टव्याय नमो नमः ।
नित्यकालात्मने तुभ्यं नमः स्वाध्यायशालिने ॥१४॥
नमः परमहंसाय नमः सत्त्वगुणाय ते ।
स्थिताय परमे व्योम्नि भूयो भूयो नमो नमः ॥१५॥
हरिर्देहभृतामात्मा परप्रकृतिरीश्वरः ।
त्वत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥१६॥
संसारसागरे घोरे विषयावर्त्तसंकुले ।
अपारे दुस्तरे ऽगाधे वर्तेऽहं कर्मभिः स्वकैः ॥१७॥
अनाथमगतिं भीरु दययापरया हरे ।
मामुद्धर दयासिन्धो संसाराब्धेः सुदुस्तरात् ॥१८॥
मन्त्रहीनं क्रियाहीनं भक्तिहीनं यद्वचितम् ।
तत् क्षन्तव्यं प्रपन्नानामपराधसहो ह्यसि ॥१९॥

अपराधसहस्रभाजनं, पतितं भीमभवार्णवोदरे ।
अगतिं शरणागतं हरे, कृपया केवलमात्मसात्कुरु ॥२०॥
जन्मप्रभृति दासोऽस्मि शिष्योऽस्मि तनयोऽस्मि ते ।
त्वं च स्वामी गुरुर्माता पिता च मम माधव ॥२१॥
नाहं हित्वा प्रजानामि त्वां भजाम्येव केवलम् ।
बुद्ध्वैवं मम गोविन्द भक्त्युपायेन मां हरे ॥२२॥
त्वां विना मे प्रियो नान्यो नेदं नेवमितीति च ।
बुद्धिं नीतिं च मे देहि येन त्वामुपयाम्यहम् ॥२३॥
इति विज्ञाप्य देवेशं वैश्वदेव स्वधामनि ।
कुर्यात्पञ्चमहायज्ञानपि गृह्योक्तकर्मणा ॥२४॥
इत्यादिसमये तत्र कथितः कमलासन ।
वेदानां सारमुद्धृत्य सर्वागमसमृद्धये ॥२५॥

इति श्रीपाञ्चरात्रागमे महोपनिषदि ब्रह्मतन्त्रे श्रीमदष्टाक्षरकल्पे जितन्तेस्तोत्रे पञ्चमोऽध्यायः ॥५॥

मन्त्रपुष्पाञ्जलिः

हरिः ॐ तद्विष्णोःपरमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद् विप्रासो विपण्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदम् । पर्याप्त्याऽनन्तरायाय सर्वस्तोमोऽतिरात्रमुत्तममहर्भवति सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयतीति, हरिः ॐ शान्तिः ॥३॥

सुगन्धवल्लीशतपत्रजाति, सुवर्णचम्पावकुलोद्भवानि ।
गृहाण देवेश मयार्पितानि, प्रभो हरे श्रीतुलसीदलानि ॥

तुलसीदलैर्निम्ननामभि-रर्चयेत्

केशवादिद्वादशनामावलिः—

१ ॐ केशवाय	नमः	७ ,, त्रिविक्रमाय	नमः
२ ,, नारायणाय	,,	८ ,, वामनाय	,,
३ ,, माधवाय	,,	९ ॐ श्रीधराय	,,
४ ,, गोविन्दाय	,,	१० ,, हृषीकेशाय	,,
५ ,, विष्णवे	,,	११ ,, पद्मनाभाय	,,
६ ,, मधुसूदनाय	,,	१२ ,, दामोदराय	नमः

श्रीलक्ष्मीद्वादशनामावलिः—

१ ॐ श्रियै	नमः	७ ॐ वरारोहायै	नमः
२ ,, अमृतोद्भवायै	,,	८ ,, हरिवल्लभायै	,,
३ ,, कमलायै	,,	९ ॐ शार्ङ्गिण्यै	,,
४ ,, चन्द्रसोन्दर्यै	,,	१० ,, देवदेविकायै	,,
५ ,, विष्णुपत्न्यै	,,	११ ,, लोकसुन्दर्यै	,,
६ ,, वैष्णव्यै	,,	१२ ,, महालक्ष्म्यै	नमः

१ ॐ श्रीकृष्णाय	नमः	१८ ॐ शकटासुरभञ्जनाय	नमः
२ ,, कमलानाथाय	,,	१९ ,, नन्दव्रजजनानन्दिने	,,
३ ,, वासुदेवाय	,,	२० ,, सच्चिदानन्दविग्रहाय	,,
४ ,, सनातनाय	,,	२१ ,, नवनीतविलिप्ताङ्गाय	,,
५ ,, वसुदेवात्मजाय	,,	२२ ,, नवनीतनटाय	,,
६ ,, पुण्याय	,,	२३ ,, अनघाय	,,
७ ,, लीलामानुषविग्रहाय	,,	२४ ,, नवनीतनवाहाराय	,,
८ ,, श्रीवत्सकौस्तुभधराय	,,	२५ ,, मुचुकुन्दप्रसादकाय	,,
९ ,, यशोदावत्सलाय	,,	२६ ,, षोडशस्त्रीसहस्रेशाय	,,
१० ,, हरये	,,	२७ ,, त्रिभङ्गीमधुराकृतये	,,
११ ,, चतुर्भुजात्तचक्रासि-गदाशंखाद्यायुधाय	,,	२८ ,, शुकवागमृताब्धये	,,
		२९ ,, गोविन्दाय	,,
१२ ,, देवकीनन्दनाय	,,	३० ,, योगिनांपतये	,,
१३ ,, श्रीशाय	,,	३१ ,, वत्सवाटचराय	,,
१४ ,, नन्दगोपप्रियात्मजाय	,,	३२ ,, अनन्ताय	,,
१५ ,, यमुनावेगसंहारिणे	,,	३३ ,, धेनुकासुरमर्दनाय	,,
१६ ,, बलभद्रप्रियानुजाय	,,	३४ ,, तृणीकृत तृणावर्ताय	,,
१७ ,, पूतनाजीवितहराय	,,	३५ ,, यमलार्जुनभञ्जनाय	,,

३६	ॐ उत्तालतालभेत्रे	नमः	५९	ॐ वृन्दावनान्तसञ्चारिणे	नमः
३७	,, तमालश्यामलाकृतये	,,	६०	,, तुलसीदामभूषणाय	,,
३८	,, गोपगोपीश्वराय	,,	६१	,, स्यमन्तकमणिहर्त्रे	,,
३९	,, योगिने	,,	६२	,, नरनारायणात्मकाय	,,
४०	,, कोटिसूर्यसमप्रभाय	,,	६३	,, कुब्जाकृष्टाम्बरधराय	,,
४१	,, इलापतये	,,	६४	,, मायिने	,,
४२	,, परञ्ज्योतिषे	,,	६५	,, परमपुरुषाय	,,
४३	,, यादवेन्द्राय	,,	६६	,, मुष्टिकासुरचाणूरमल्ल-युद्धविशारदाय	,,
४४	,, यदूद्वहाय	,,			
४५	,, वनमालिने	,,	६७	,, संसारवैरिणे	,,
४६	,, पीतवाससे	,,	६८	,, कंसारये	,,
४७	,, पारिजातापहारकाय	,,	६९	,, मुरारये	,,
४८	,, गोवर्द्धनाचलोद्धर्त्रे	,,	७०	,, नरकान्तकाय	,,
४९	,, गोपालाय	,,	७१	,, अनादिब्रह्मचारिणे	,,
५०	,, सर्वपालकाय	,,	७२	,, कृष्णाव्यसनकर्षकाय	,,
५१	,, अजाय	,,	७३	,, शिशुपालशिरश्छेत्रे	,,
५२	,, निरञ्जनाय	,,	७४	,, दुर्योधनकुलान्तकाय	,,
५३	,, कामजनकाय	,,	७५	,, विदुराक्रूरवरप्रदाय	,,
५४	,, कञ्जलोचनाय	,,	७६	,, विश्वरूपप्रदर्शकाय	,,
५५	,, मधुघ्ने	,,	७७	,, सत्यवाचे	,,
५६	,, मथुरानाथाय	,,	७८	,, सत्यसङ्कल्पाय	,,
५७	,, द्वारकानाथाय	,,	७९	,, सत्यभामारताय	,,
५८	,, वलिने	,,	८०	,, जयिने	,,

८१	ॐ सुभद्रापूर्वजाय	नमः	९६	ॐ दानवेन्द्रविनाशकाय	नमः
८२	,, जिष्णवे	,,	९७	,, नारायणाय	,,
८३	,, भीष्ममुक्तिप्रदायकाय	,,	९८	,, परब्रह्मणे	,,
८४	,, जगद्गुरवे	,,	९९	,, पन्नगाशनवाहनाय	,,
८५	,, जगन्नाथाय	,,	१००	,, जलक्रीडासमासक्त-गोपीवस्त्रापहारकाय	,,
८६	,, वेणुनादविशारदाय	,,			
८७	,, वृषभासुरविध्वंसिने	,,	१०१	,, पुण्यश्लोकाय	,,
८८	,, बाणासुरकरान्तकाय	,,	१०२	,, तीर्थपादाय	,,
८९	,, युधिष्ठिरप्रतिष्ठात्रे	,,	१०३	,, वेदवेद्याय	,,
९०	,, बर्हिबर्हावतंसकाय	,,	१०४	,, दयानिधये	,,
९१	" पार्थसारथये	,,	१०५	,, सर्वभूतात्मकाय	,,
९२	" अव्यक्ताय	"	१०६	,, सर्वग्रहरूपिणे	,,
९३	" गीतामृतमहोदधये	"	१०७	,, परात्पराय	"
९४	" कालीयफणिमाणिक्य-रञ्जितश्रीपदाम्बुजाय	"	१०८	" श्रीरुक्मिणीसत्यभामा-समेत श्रीगोपालस्वामिने	"
९५	" यज्ञभोक्त्रे	"		" श्रीमते नारायणाय	"
				" श्रीमते रामानुजाय	"

श्री लक्ष्मीअष्टोत्तर शत १०८ नामावली

ॐ प्रकृत्यै नमः विकृत्यै. विद्यायै. सर्वभूतहितप्रदायै. श्रद्धायै. विभूत्यै. सुरभ्यै. परमात्मिकायै. वाचे. पद्मालयायै. पद्मायै. शुच्यै. [illegible] सुधायै. धन्यायै. हिरण्मय्यै. लक्ष्म्यै. नित्यपुष्टायै. विभावर्यै. अदित्यै. दित्यै. दीप्तायै. वसुधायै. वसुधारिण्यै. कमलायै. कान्तायै. ॐ क्षमायै नमः

ॐ श्रीरोदसम्भवायै नमः अनुग्रहपरायै. बुद्धयै. अनघायै. हरिवल्लभायै. अशोकायै. अमृतायै. दीप्तायै. लोकशोकविनाशिन्यै. धर्म निलयायै. करुणायै. लोकमात्रे. पद्मप्रियायै. पद्महस्तायै. पद्माक्ष्यै. पद्मसुन्दर्यै. पद्मोद्भवायै. पद्ममुख्यै. पद्मनाभप्रियायै. रमायै. पद्ममाला धरायै. पद्मिन्यै. पद्मगन्धिन्यै. पुण्यगन्धायै. सुप्रसन्नायै. प्रसादाभि मुख्यै. प्रभायै. चन्द्रवदनायै. चन्द्रायै. चन्द्र सहोदर्यै. चतुर्भुजायै. चन्द्ररुपायै. इन्दिरायै. इन्दुशीतलायै. आह्लाद जनन्यै. पुष्टयै. शिवायै. शिवकर्यै. सत्यै. विमलायै. विश्वजन्यै. तुष्टयै. दारिद्र्यनाशिन्यै. प्रीति पुस्करिण्यै. शान्तायै. शुक्लमाल्याम्बरायै. श्रियै. भास्कर्यै. बिल्वनिलयायै. वरारोहायै. यशस्विन्यै. वसुन्धरायै. उदाराङ्गायै. हरिण्यै. हेममालिन्यै. धनधान्यकर्यै. सिद्धयै. स्त्रैण सौम्यायै. शुभप्रदायै. नृपवेश्मगता-नन्दायै. वरलक्ष्म्यै. वसुप्रदायै. शुभायै. हिरण्यप्राकारायै. समुद्रतनयायै. जयायै. मङ्गलायै. देव्यै. विष्णुवक्षस्थलस्थितायै. विष्णुपत्न्यै. प्रसन्नाक्ष्यै. नारायणसमाश्रितायै. दारिद्र्यध्वंसिन्यै. देव्यै. सर्वोपद्रववारिण्यै. नवदुर्गायै. महाकाल्यै. ब्रह्माविष्णु-शिवात्मिकायै. त्रिकाल ज्ञानसम्पन्नायै. भुवनेश्वर्यै. श्रीमहालक्ष्म्यै. श्रीदेव्यै. भूदेव्यै. नीलादेव्यै. गोदादेव्यै. ॐ श्रीरङ्गनायकी-महालक्ष्म्यै नमः

सम्पादकको भनाइ

यो पितृयाग पद्धतिको जन्म श्रीप्रपन्न जगद्गुरु १००८ श्रीविभूषित योगीराज स्वामी कमलनयनाचार्य माइधार काणातारा (पूर्व अवस्था पराङ्कुशाचार्य रिडी = हाल श्रीशठकोप यतिराज जीयर सहस्रधारा) ले लिखत कपिबाट श्रीवैष्णवविधिबाट कर्म गराएको थाहा पाई अति उपयोगी ठानी छपाउन प्रेरणा गर्नुभई वि. सं. ०३३ मा प्रथम संस्करण छपाई वितरण भएका हुन् । पुनः माग बढ्दै गई अभाव भएको देखी ०४५।६।२४ मा द्वितीय संस्करण छपाउने भनी मलाई आज्ञा भएको थियो । म जुन् बृहत् कार्य बृहद्ब्रह्मसंहितातिर लागें सोको छपाई पुरा भई वितरण भए तुंदैछन् त्यसैले यो काम केही ढीला भयो त्यसमा क्षमा याचना गर्दछु ।

ग्रन्थकर्ताका श्रीवैष्णव समाजमा उपयोगी यस्तै यस्ता कृतिहरू अनेक छन् जुन मैले थाहा पाएकाअनुसार निम्न प्रकारका छन् ।

१) श्रीवैकुण्ठचन्द्रिका
२) हवनपद्धति
३) लघुसन्ध्याविधि
४) मोक्षानन्द
५) आकार त्रय सुधा
६) उपदेश रत्नमाला (अर्थसहित)
७) प्रपन्नयादिद्वादशकम्
१०) वैकुण्ठपोखरी
११) प्रपन्नपारिजात
१२) प्रपन्नसारावलि
१३) पूर्वाचार्यसूक्तिसुधा
१४) निरुपणानि (नेपाली टीका)
१५) निरुपणानि (संस्कृत टीका)
१६) रहस्यमुक्तावलि

८) वैराग्यमञ्जरी

९) अचिरादिमार्ग (अर्थसहित)

१७) रहस्यरत्नावलि

१८) तत्त्वविचार

१९) सद्गुणोदय (आदि)

मैले थाहा नपाएका पनि अरू कति हुनन् ।

सर्वसाधारण एवं विद्वान् वर्गहरूमा यस पुस्तकले अथवा प्रेसबाट कतिपय त्रुटि रहन गएका हुनन् ती त्रुटिहरू अल्पज्ञताले गर्दा मेरा हुन् । विद्वान्हरूले क्षमा गर्नुहुनेछ । आफूलाई वाक्य शुद्धिको अनुभव नहुँदा गुरुहरूबाट शुद्ध गराई कर्म गर्नु हुन अनुरोध गर्दछु किनकि--

पितर: वाक्य मिच्छन्ति श्रद्धामिच्छन्ति देवता: ।।

पितृहरू शुद्ध वाक्य चाहन्छन् । देवताहरू श्रद्धा भएपछि खुशी हुन्छन् ।

सम्पादक

वि. सं. २०४७ पौष १४ शनिवार

पराङ्कुश रा. श्री. निरौला

रमाइलो गाउँ

□

हे मित्र हो ! भ्रमर झैं भित्र भित्र घुसी घुसी
मोज मारेर मनमा लौ गुणै गुण खोज है ।
रमाउने फोहरमा अन्त आँखा नलाउने
माखाले घाउ खोजे झैं दोषै दोष नखोज है ।।

।। संक्षिप्तपुण्याहवाचनम् ।।

हरि: ॐ पुण्याहं, स्वस्ति, ऋद्धिमित्योंकारपूर्वकं त्रिस्त्रिरेकैकामाशिष: वाचयेत् (इति बोधायन:) ।।

ॐ पुनस्त्वादित्या रुद्रा वसव: समिन्धताम् । पुनर्ब्रह्माणो वसुनीथ यज्ञै: । घृतेन त्वं तन्वं वर्द्धयस्व सत्या: सन्तु यजमानस्य कामा: ।

भो ब्राह्मणा अस्य यजमानस्य पुण्याहं भवन्तो ब्रुवन्तु, प्रतिवचनं, पुण्याहमस्तु ३ ।।

ॐ स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा: । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु ।।

भो ब्राह्मणा अस्य यजमानस्य स्वस्ति भवन्तो ब्रुवन्तु । प्रतिवचनं, स्वस्तिरस्तु ३।।

ॐ ऋध्यामस्तोमं सनुयाम वाज । मानो मन्त्रं सरथेहोपयातम् । यशो न पक्व मधुगोष्वन्तरा । भूतांशो अश्विनो: काममप्रा: (ऋक् ८-६-२)

भो ब्राह्मणा अस्य यजमानस्य ऋद्धिं भवन्तो ब्रुवन्तु । प्रतिवचनं, ऋद्धिरस्तु ३।।

आब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्य: शुरऽइषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशु: सप्ति: पुरन्धिर्योषा जिष्णू रथेष्ठा सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे न: पर्जन्यो वर्षतु फलवत्यो न ऽ ओषधय: पच्यन्ता न्योगक्षेमो न: कल्पताम् ।

श्रीमते रामानुजाय नमः

यस पुस्तकमा भएको मात्र सबै विषय नछोडी अर्को संस्करण छपाउन (अरू केही नबदली) श्री फणीन्द्रप्रसाद निरौला (पराङ्कुश निरौलाजी) लाई अधिकार दिइएको छ ।

पराङ्कुश जीयर

०४५।६।२४

उपर्युक्त शब्द श्रीस्वामी शठकोप यतिराज जीयर स्वामीका हुन् । त्यसअनुसार छाप्ने कार्य गरेको छु ।

पराङ्कुश निरौला

पुस्तक प्राप्तिस्थान

१) लक्ष्मीनारायण मन्दिर
माइधार, झापा

२) पराङ्कुश निरौला
रमाइलो गाउँ, मोरङ्ग